The *Nirukta-Nighaṇṭu* (2,7) includes 'andhas' among the names of food (anna-nāmāni): in fact, it heads the names. The glossator notes the following details :

आध्यानीयं भवति इति भाष्यम् (५,९) । आभिमुख्येन हि ध्यातव्यम् । सर्वेण अन्नं प्रीतेः शरीरस्थितेश्च तदायत्तत्वात् । (इति स्कन्दस्वामी) । आङ्पूर्वात् ध्यायतेरसुनि बाहुलकात् यकाराकारयोर्लोपः । उपसर्गस्य ह्रस्वत्वम् । नुडागमश्च धातोः ॥

अथवा अद भक्षणे । इत्यस्मात् 'अदेर्नुम् धश्च' (उणादिसूत्रे ५,२००) ॥

अनित्यनेनान्धः (इति क्षीरस्वामी) । अनितेरसुनि बाहुलकात् धुगागमः । अनित्यन्नं हि प्राणनम् ॥

Food is called 'anna' because (1) beings think of it foremost, for the very life and satisfaction depend upon it (ā dhyānīyam), as Kshīrasvāmi notes; (2) beings consume it (ad bhakshaṇe); or (3) it signifies the living process (aniti, prāṇanam) of all beings. As a synonym, 'andhas' must involve these shades of meaning. The andhas is described as 'madira', (madirāṇi, mada-karāṇi), which means "intoxicating", "inebriating", "maddening", but in the context it has the sense of being pleasant (prītikarāṇi), making one happy and favourably inclined (as in 2,18,7 'mādayasva', which according to Sāyaṇa means "hṛshṭo bhava", or in 2,19,1 'madāya' "for happiness"). References to 'andhas' in the mantras of Ṛgveda are of this kind: offerings by the devotee which are in the nature of pious and poetic articulations (food), and which are calculated to cause delight to the recipients. One of the mantras claims that such articulations are all that are offered ('acchhā vocheyam') and no substances which are conventional gifts are to be expected (4,1,19) :

शुच्यूधो अतृणन्न गवा**मन्धो**

न पूतं परिषिक्तम् ।।

Consider these references, which support the above view :

तस्मा इन्द्राया**न्धसो** जुहोत ।।

(2,14,5)

अपाय्यस्या**न्धसो** मदाय मनीषिणः

सुवानस्य प्रयसः ।।

(2,19,1)

त्वं विप्रस्त्वं कविर्मधु प्र जातम**न्धसः** ।।

(9,18,2)

तव त्य इन्दो **अन्धसो** देवा

मधोर्व्यश्नते ।।

(9,51,3)

तरत्स मन्दी धावति धारा

सुतस्या**न्धसः** ।।

(9,58,1)

अधा ते सख्ये **अन्धसो** वि वो

मदे रणन् गावो न यवसे विवक्षसे ।।

(10,25,1)

तं वो विं न द्रुषदं देवं अन्धस इन्दुम् ॥

(10, 115, 3)

May such food viz. the pious and fervent articulations, with which the belly of Indra and Vishṇu are filled reach them (ā agman). The words for reaching 'ā agman' signify "coming near", referring to Indra and Vishṇu (vām).

(४) मे ब्रह्माणि हवं उपश्रुणुतम् ॥

The two gods are begged to listen attentively (upa-śruṇtam) to the articulations (brahmāṇi, already explained), of the seer (me, madīyāni), which are in the nature of invocations or invitations (havam, āhvānam) for them.



(31)

(संहितापाठः)

उभा जिग्यथुर्न परा जयेथे न परा
जिग्ये कतरश्चनैनोः ।
इन्द्रश्च विष्णो यदपस्पृधेथां त्रेधा
सहस्रं वि तदैरयेथाम् ॥ ८ ॥ (३१)

(पदपाठः)

उभा । जिग्यथुः । न । परा । जयेथे इति । न । परा । जिग्ये ।
कतरः । चन । एनोः ।
इन्द्रः । च । विष्णो इति । यत् । अपस्पृधेथाम् । त्रेधा ।
सहस्रम् । वि । तत् । ऐरयेथाम् ॥

(अन्वयः)

इन्द्रश्च विष्णो, उभा जिग्यथुः । न परा जयेथे । एनोः कतरश्चन न परा जिग्ये । यत् अपस्पृधेथां त्रेधा सहस्रं वि तत् ऐरयेथाम् ॥

इन्द्रश्च विष्णो	O Indra and Vishṇu
उभा	the two of you

जिग्यथुः	(are) victorious
न परा जयेथे	even have you been conquered by any one
एनोः	of the two of you;
कतरश्च	either one or the other
न पराजिग्ये	has never been vanquished.
यत्	with whomsoever
अपस्पृधेथाम्	you have contended
त्रेधाम् सहस्रं	thrice thousands
वि तत् ऐरयेथाम्	you have beaten them back and settled them in their places.

The meaning of the mantra is clear and direct. The unique might of Indra and Vishṇu is eulogized. They are invincible, and none can get an edge over them. The expression 'tredhā sahasram', however, needs some explanation. 'Thousands', of course, has the sense of "innumerable (amitam, asamkhyam). 'Thrice' referes to the three aspects of existence: the physical world, the scriptural directions and verbal expressions (loka-veda-vāgātmanā tridhā sthitam). The word 'airayethām' (from the root 'īra kshepe, "to throw") signifies that Indra and Vishṇu overcome all obstacles and opposition

and establish all objects and events in their proper places (vyakramethām). Another mantra makes the meaning explicit (1,1,63)

इन्द्रो दीर्घाय चक्षस आ सूर्यं रोहयद्दिवि
वि गोभिरद्रिमैरयत् ॥

Indra settled the sun high in the sky; and by the rays of the sun or processes of knowledge (gobhih) regulated (airayat) the chief life-force (mukhya-vāyu, imagined as the unshakable mountain, adri, which means that which every one is fond of, ādriyate, ādaraṇa-yogya). Ānanda-tīrtha explains tha hidden meaning :

ज्ञानैः आदरयोग्यं च प्राणात्मानं समैरयत् ॥

* * * * * * *

ॐ श्रीदेवाय नमः। ॐ श्रीदेवाय नमः। ॐ श्रीदेवाय नमः। ॐ श्रीदेवाय नमः।

गरुडः ह्रीं। गरुडः ह्रीं। गरुडः ह्रीं। गरुडः ह्रीं। गरुडः ह्रीं। गरुडः ह्रीं।

Appendix - I

ŚAUNAKA'S ṚGANUVĀKĀNUKRAMAṆĪ

(with Shaḍguruśishya's Gloss)



।। शौनकीय-अनुवाकानुक्रमणी ।।

(षड्गुरुशिष्यवृत्तिसहिता)

वृत्तिः ।।

सर्वं कर्म सफलं यत्र तुष्टेऽतुष्टे न किञ्चित् तमहं नमामि ।
विनायकं गिरिराजेन्द्रपुत्रीमहेश्वरप्रियसूनुं घृणाब्धिम् ।। ।। १ ।।

बह्वृचानां जनानां तु शौनकस्य प्रसादतः ।
अनुवाकानुक्रमणीरूपं किञ्चित् प्रवर्ण्यते ।। ।। २ ।।

पितृदेवर्षिसाध्येभ्यो ब्राह्मणेभ्यश्च सर्वशः ।
आचार्येभ्यो गुरुभ्यश्च प्रणम्य प्रयतः शुचिः ॥ ॥ ३ ॥

तादर्थ्ये प्रणम्य । प्रयतो जितेन्द्रियः । द्विविधं शौचम्— मृज्जलाभ्यां बाह्यम्, आन्तरमर्थशुद्धिः । प्रणम्य ॥ ३ ॥

(This is a general introduction. The three verses above are probably in Shaḍguru-śishya's Gloss, and are not to be asceribed to Śaunaka.)

ततः किम् ?—

(1)

सर्वानुक्रमणी—

मधुच्छन्दःप्रभृतिभिर्ऋषिभिर्हि तपोबलात् ।
दृष्टानामनुवाकानामृजुर्वक्ष्याम्यतन्द्रितः ॥ ॥ ४ ॥

ऋजु । वर्तमानानां च ऋजुः । अतन्द्रितः । तारकादिभ्य इतच् ॥ ४ ॥

(This is perhaps the first verse of Sarvānukramaṇī.)

सूक्तादिपरिमाणं तु सङ्ख्यां च क्रममेव च ।
मण्डले मण्डले चैव यावन्तो हि समीरिताः ॥ ॥ ५ ॥

आदि सूक्तपरिमाणम् । परी दीर्घश्छान्दसः । सङ्ख्यां सर्वविषयक्रममेव च । हृदमस्यापरमिति । यावन्तः अनुवाकाः ।। ५ ।।

सूक्तसङ्ख्यानुवाकानां सूक्तानामृक्समाहिता ।
पदाक्षरसमाम्नायं छन्दस्येव प्रतिष्ठितम् ।। ।। ६ ।।

तत् सर्वं वक्ष्यामीत्यन्वयः ।। ६ ।।

अनुवाक्यस्य नित्याध्ययने प्रयोजनमित्याह—

एकैकमनुवाकं तु खिलानि ब्राह्मणानि च ।
संवत्सरे संवत्सरे पठेदहरहः शुचिः ।। ।। ७ ।।

ब्रह्म कृण्वन्तः परिवत्सरीणम् (RV 7,103,8) इति श्रुतेः ।। ७ ।।

अस्य तु नित्याध्ययनस्य—

श्रावणस्य तु मासस्य पौर्णमास्यामुपक्रमः ।
समाप्य तर्पयेद् देवानृषीन् पितॄननुक्रमात् ।। ।। ८ ।।

देवान् प्रजापत्यादीन् मन्त्रस्य । ऋषीन् शतर्च्यादिमहासूक्तान्तान् । पितॄन् सुमन्त्वादि प्रतिपुरुषं पितॄनित्यन्तान् ।। ८ ।।

(2)

तदर्थम्—



ऋग्वेद शैशिरीयायां संहितायां यथाक्रमम् ।

प्रमाणमनुवाकानां सूक्तैः श्रुणुत शाकलाः ॥ ॥ ९ ॥

शैशिरीयायाम् । शिशिरनाममहर्षिप्रोक्तायाम् । शिशिरर्तुसमाप्यायामित्यन्ये । शाकलस्य संहिताया-मित्यर्थः । प्रमाणं निबोधनं प्रतिपादनमित्यर्थः । शास्त्र उक्तं हि—

प्रमाणं बोधनेयत्ता मर्यादा शास्त्रहेतुषु ।
सम्यग्वक्तरि च ॥ इति (Vaijayantī-kosha 351,461) ।

अनुवाकानां सूक्तैः । सहेति शेषः । श्रुणुत हे शाकलाः ॥ ९ ॥

के ते ? सर्वेषां शाकलत्वमाप्रीद्वारेण वक्तुमाप्रीद्रष्टॄनाह—

कण्वाङ्गिरोऽगस्त्यशुनका विश्वामित्रोऽत्रिरेव च ।
वसिष्ठकश्यपवाध्वश्वा जमदग्निरथोत्तरम् ॥ ॥ १० ॥

आप्रीद्रष्टार एते । इदं शास्त्रं शाकलानामेव संबन्धनम् इत्यन्ये । जमदग्निरथोत्तरम् । दशममाप्रीसूक्तं जमदग्निर्ददर्श । प्राजापत्ये पशौ सर्वेषामाप्रियो जामदग्न्य इति सर्वे शाकलाः ।

The reference is to the celebrated Āprī-sūkats. The seers of this sūkta are (1) Kaṇva, (2) Āṅgira, (3) Agastya, (4) Śunaka, (5) Viśvāmitra, (6) Atri, (7) Vasishṭha, (8) Kaśyapa, (9) Vādhva, and (10) Jamadagnī. The sūktas are ten in number : 1,13; 1,142; 1,188; 2,3; 3,4; 5,5; 7,2; 9,5; 10,70; and 10,110.)

श्लोकस्यास्य यथासङ्ख्य सूक्तानि दश वै विदुः ।
न आ वहाग्न आक्ष वहाद्य राजसीत्यग्नि च ॥ ॥ ११ ॥

सुसमिद्धो न आ वह (1,73) । समिद्धो अग्न आ वह (1,142) । समिद्धो अद्य राजसि (1,188) । समिद्धो अग्निर्निहितः (2,3) ॥ ११ ॥

सुमित्समित्सु शोचिषे जुषस्व विश्वतस्तथा ।
इमां मे अद्य मन्विमा यथर्षिपक्ष आप्रियः ॥ ॥ १२ ॥

समित्समित सुमनाः (3,4) । समिद्धाय शोचिषे (5,5) । जुषस्व नः समिधमग्ने अद्य (7,2) । समिद्धो विश्वतस्पतिः (9,5) । इमां मे अग्ने समिधं जुषस्व (10,70) । समिद्धो अद्य मनुषो दुरोणे (10,110) ॥ १२ ॥

(cf. *Nirukta* 5,4)

वसिष्ठशुनकौ विना समिद्धसर्वपक्षता ।
जुषस्वादिद्वितीयया तनूनपाद्विरोधिता ।
यजुः श्रुतौ तथा श्रुतेः समिद्धसूक्तमध्यतः ॥ ॥ १३ ॥

प्रजापतेः पशो सदा भवेयुरद्य मन्विमा ।
इतीरितं हि बह्वृचैर्यथार्षि वेत्ति सूत्रतः ॥ ॥ १४ ॥

अग्निमीळे त्रिसूक्तस्तु सुरूपैन्द्र चतुःसूक्तौ ।
अग्निं सोमानमित्येतौ षट्कौ कस्येति सप्तकः ॥ ॥ १५ ॥

अग्निमीळे त्रिसूक्तस्तु । अनुवाकविशेषः । सुरूपैन्द्र चतुःसूक्तौ । अनुवाकविशेष इत्यादि यथायोगमुत्तरत्रापि वेदितव्यम् । सुरूपकृत्नुमूतये (1,4) । ऐन्द्र सानसिं रयिम् (1,8) । अग्निं दूतम् (1,12) । सोमानं स्वरणम् (1,18) । कस्य नूनम् (1,24) ॥ १५ ॥

त्वमग्ने पञ्चकं विद्यात् प्र वो यह्वमथाष्टकम् ।
अग्ने विवस्वदभि त्यं नू चित्ते सप्तकास्त्रयः ॥ ॥ १६ ॥

पञ्चकम् । अनुवाकं पञ्चसूक्तम् । त्वमग्ने प्रथमो अङ्गिराः (1,31) । प्र वो यह्वम् (1,36) । अग्ने विवस्वद् अभि त्यं नू चिदिति ये त्रयोऽनुवाकाः सप्तसूक्तकाः । अग्ने विवस्वदुषसः (1,44) । अभि त्यं मेषम् (1,51) । नू चित् सहोजाः (1,58) ॥ १६ ॥

पश्वा न नवकं विद्यादुप प्रयन्तो दशैकं च ।

खैलिकानामनादेशोऽस्मिन् ग्रन्थेऽनुवाकानाम् ॥ ॥ १७ ॥

पश्वा न तायुम् (1,65) । उप प्रयन्तो अध्वरम् (1,74) । एकादशसूक्तं विद्यादित्येव । नन्वत्र मध्ये खिलमार्षानुक्रमण्यादिवत् किं नोच्यत इत्याह— अस्मिन्ननुवाकानां ग्रन्थे खैलिकानामनुवाकाना-मनादेशः । अनुक्ता हि ॥ १७ ॥

यस्तु चर्चायते वेदे तस्य सङ्ख्येति नः श्रुतिः ।

प्र ये शुम्भन्ते नवकमिमं द्वादशकं विद्यात् ॥ ॥ १८ ॥

योऽनुवाकश्चर्चायते सम्यगभ्यस्यते । चर्चेवाचरतीति क्यङ् । यद्वा चर्चयाभ्यसनेनायते । आभिमुख्येन बद्धः । यमु बन्धने क्तः । वेदे । वेदपारायणाध्ययने तस्य सङ्ख्या विज्ञेयेति । नः । अस्माकम् । श्रुतिः । उपदेशः । अतोऽत्तोत्तरत्रापि खिलवर्जमृगुच्यत इति भावः ।

प्र ये शुम्भन्ते जनयः (1,85) । इमं स्तोमम् (1,94) ॥ १८ ॥

इन्द्रं मित्रं दशैवाथ नासत्याभ्यां तु पञ्चकम् ।

कदित्था षट् परः सप्ताग्निमाध्वाजुवः षट्कम् ॥ ॥ १९ ॥

इन्द्रं मित्रं वरुणम् (1,106)। अत्र दश सूक्तानि । नासत्याभ्यां बर्हिरिव (1,116) । कदित्था नॄन् (1,121) । अग्निमित्यपरोऽनुवाकः सप्तसूक्तकः । अग्निं होतारं मन्ये (1,127) । आ त्वा जुवो रारहाणाः (1,134) ॥ १९ ॥

वेदिषदे सप्तदशाबोधीत्यष्टौ सूक्तानि ।

कया त्रिपञ्चसूक्तस्तु युवोर्द्वादशकं विद्यात् ॥ ॥ २० ॥

वेदिषदे प्रियधामाय (1,140) । अबोध्यग्निर्ज्मः (1,151) । कया शुभा (1,165) । त्रिपञ्चसूक्तः । पञ्चदशसूक्त इति यावत् । युवो रजांसि (1,180) ॥ २०॥

(Bāshkala-krama in First maṇḍala)

इत्याद्ये मण्डले दृष्टाश्चत्वारो विंशतिश्चैव ।
गौतमादौशिजः कुत्सः परुच्छेपादृषेः परः ।
कुत्साद् दीर्घतमा इत्येष तु बाष्कलकः क्रमः ॥ ॥ २१ ॥

चत्वारो विंशतिश्चैव । अनुवाकाः । अथ बाष्कलकेऽस्य विशेषमाद्यमण्डल आह । उप प्रयन्तो नासत्याभ्याम् अग्निं होतारम् इमं स्तोमं वेदिषद इति बाष्कलकः क्रम इत्यर्थः । उप प्रयन्त इमं स्तोमं नासत्याभ्याम् अग्निं होतारं वेदिषद इति शाकलकः क्रमः । अत्रैवमुक्तेरुत्तरमण्डलनवकेऽनुक्रमविपर्यासः ॥ ॥ २१ ॥

॥ इति प्रथमं मण्डलं समाप्तम् ॥



(3)

(The number of Avuvākas in the other maṇḍalas)

त्वं यो गणानामा ते दश तृतीयत एकादशास्त्रयः परे ।
सोमस्य मा तवसं द्वादशोक्तं प्र वो देवायेति सप्तदशकं तु विद्यात् ॥ २२ ॥

त्वमग्ने द्युभिः(2,1) । यो जात एव (2,12) । गणानां त्वा (1,23)। आ ते पितः (2,33) । गणानां तृतीये सूक्तानि दश । त्वं यो आ त इत्यन्ये त्रयोऽनुवाका एकादशसूक्तकाः ।

॥ इति द्वितीयं मण्डलम् ॥

(4)

सोमस्य मा तवसम् (3,1) प्र वो देवाय (3,13) ॥ २२ ॥

इच्छन्ति त्वा नवेन्द्र मतिस्त्रिपञ्चको नवक इमं महे ।
त्वां ह्यग्ने दश भद्रं यन्नस्त्वेकादशकावुभाविभौ ॥ ॥ २३ ॥



इच्छन्ति त्वा (3,30)। इन्द्रं मतिहृद आ वच्यमाना (3,39) । पञ्चपञ्चाशक इत्यर्थः । इमं महे विदथ्याय (3,54)।

॥ इति तृतीयं मण्डलम् ॥

त्वां ह्यग्ने सदमित् (4,1)। भद्रं ते अग्ने (4,11)। यन्न इन्द्रः (4,22)॥ २३ ॥

(5)

त्रयोदशायं प्र ऋभुभ्य ईरितोऽग्रं पिबेत्येष चापि त्रयोदश ।

अबाध्यग्निः समिधा चतुर्दशातः परोऽष्टादशकः प्र वेधसे ॥ ॥ २४ ॥

प्र ऋभुभ्यो दूतमिव (4,33) । अग्रं पिबेत्येष चापि त्रयोदश । अग्रं पिबा मधूनाम् (4,46) ।

इति चतुर्थं मण्डलम् ॥



अबोध्यग्निः समिधा (5,1) । प्र वेधसे कवये (5,15) ।। २४ ।।

(6)

महि महे द्वादशको विदास्तथा रुद्रासः षोडश यत्त्रिपञ्चकः ।
त्वं ह्यग्ने पञ्चदश त्वमष्टौ वृषा मदो विंशतिर्यो रयिवस्तु षट्कः ।। ।। २५ ।।

महि महे (5,33) । विदा दिवो विष्यन् (5,45) । तथा द्वादशक इति यावत् । आ रुद्रास इन्द्रवन्तः (5,57) । यदद्य स्थः (5,73) पञ्चदश ।

।। इति पञ्चमं मण्डलम् ।।

त्वं ह्यग्ने प्रथमो मनोता (6,1) । त्वमग्ने यज्ञानाम् (6,16)। वृषा मद इन्द्रे (6,24)। यो रयिवो रयिन्तमः (6,44)।। २५ ।।

(7)

द्विषड्ढुएवे स्तुषेऽथ द्विसप्तकः षष्ठः षष्ठे मण्डले ययोऽनुवाकः ।
अग्निं नरः सप्तदशाथ षोडश त्वे ह प्र शुक्र द्व्यधिका तु विंशतिः ।। ।। २६ ।।

हुवे वो देवी (6,50) द्वादश । स्तुषे नरा (6,62) षष्ठे मण्डले यः षष्ठोऽनुवाकश्चतुर्दश सूक्तः ।

।। इति षष्ठं मण्डलम् ।।

अग्निं नरो दीधितिभिः (7,1) । त्वे ह यत् पितः (7,18) । प्र शुक्रा (7,34) ॥ २६ ॥

(8)

क ईं व्यक्ताः पञ्चदशोना विंशतिरप स्वसुः पञ्चदश प्र वीरया ।
मा चिन् महाँ इन्द्रः सुतेषु पञ्चाय सप्ताष्ट वयं द्विपञ्चकः ॥ ॥ २८ ॥

क ईं व्यक्ता नरः (7,56) अप स्वसुरुषस (7,71) एकोनविंशतिः । प्र वीरया शुचयः (7,90) ।

॥ इति सप्तमं मण्डलम् ॥

मा जिदन्यद् वि शंसत (8,1) । अथ सप्त । महाँ इन्द्रो य ओजसा (8,6) । अष्ट । इन्द्र सुतेषु (8,13) । वयमु त्वामपूर्व्य (8,21) ॥ २७ ॥

(9)

यो यजाति द्वादशेमे ह षट्कोऽग्ने दशैकादशको य इत्युत ।
त्रयोदशा तू न इन्द्र क्षुमन्तमतः परो दशको गौर्धयत्ययम् ॥ ॥ २८ ॥

यो यजाति (8,31) । इमे विप्रस्य (8,43) । हकारः पूररणः । अग्न आ याह्यग्निभिः (8,60) । यो राजा रचर्षणीनाम् (8,70) । उतेति पूरणः । आ तू न इन्द्र क्षुमन्तम् (8,81) । गौर्धयति मरुताम् (8,94) । विद्यादिति शेषः । यस्तमिति च । अष्टममिति च । अतः परो दशको गौर्धयतीत्यर्थः । तमष्टममण्डलस्यान्तं विद्यात् । अतः पञ्चाशको गौर्धयत्ययमित्यन्ये पठन्ति ॥ २८ ॥

॥ इत्यष्टमं मण्डलम् ॥

(10)

स्वादिष्ठया त्र्यष्टसूक्तः पवस्व त्रिंशत् सषट्कः परः सप्तकोऽया ।
प्रष्टादशैकादशकः प्र तेऽस्य प्रेषा सप्तैकादशकः सखायः ॥ ॥ २९ ॥

स्वादिष्ठया मदिष्ठया चतुर्विंशतिसूक्तः (9,1) । पवस्व दक्षसाधनः (9,25) । त्रिंशत् सषट्कः । ङत्रत्वाभावश्छान्दसः । षटत्रिंशत्सूक्तकः । अया वीती परि स्रव (9,61) । प्र देवमच्छा (9,68) । प्र त आशवः (9,86) । अस्य प्रेषा हेमना (9,97) । सखाय आ नि षीदत (9,104) ॥ २९ ॥

॥ इति नवमं मण्डलम् ॥



(११)

अग्ने बृहन् षोळशकस्त्रयोकदश त्वष्टा प्रघ देवत्रेति चाष्टादशाच्छ ।
अष्टाविदं षोळशकस्तु भद्राः सत्येन षट् सं नवेन्द्र त्रयोदश ॥ ॥ ३० ॥

अग्ने बृहन्नुषसाम् (10,1) । त्वष्टा दुहित्रे (10,17) । प्र देवत्रा ब्रह्मणे (10,30) । अच्छ म इन्द्रम् (10,43) । इमित्था रौद्रइदम् (10,61) । भद्रा अग्नेः (10,69) । सत्येनोत्तभिता (10,85) । सं जागृवद्भिः (10,91) । इन्द्र दृह्य (10,100) ॥ ३० ॥

तमस्य द्यावापृथिवी द्व्यष्टकः परस्त्रयोविंशतिर्नासदासीत् ।
ऋग्वेदान्त्यो द्वादशकोऽनुवाकश्चत्वारिंशच्छास इत्थेति चास्मिन् ॥ ॥३१ ॥

तमस्य द्यावापृथिवी सचेतसा (10,113) । नासदासीत् (10,129) इत्येष परोऽनुवाकस्त्रयोविंशतिसूक्तकः । अस्मिन् मण्डले द्वादशक ऋग्वेदान्त्यो योऽनुवाकः शास इत्थेत्यादि तत्रानुवाके सूक्तानि चत्वरिंशत् । शास इत्था महां असि (10,152) ॥ ३१ ॥

॥ इति दशमं मण्डलम् ॥



(12)

(The Number in Anuvākas in the Maṇḍalas)

The number of anuvākas in each of the ten maṇḍalas:

1st	24
2nd	4
3rd	5
4th	5
5th	6
6th	6
7th	6
8th	10
9th	7
10th	12

अथ मण्डलेष्वनुवाकसङ्ख्यामाह—

आद्ये चतुर्विंशतिर्ह्यनुवाका अतः परं मण्डलं यच्चतुष्कम् ।
द्वे पञ्चके त्रीणि षट्कानि चैव दशाष्टमं सप्त नवमं द्वादशान्त्यम् ॥ ॥ ३२ ॥

यत् । तत्रेति शेषः । द्वितीयं मण्डलं यच्चतुरनुवाकम् । द्वे पञ्चके । अतः परमित्येव । अतः परे द्वे तृतीयचतुर्थमण्डले पञ्चानुवाके भवतः । पराणि त्रीणि मण्डलानि पञ्चमषष्ठसप्तमानि षडनुवाकानि । अष्टमम् । तत्र दशानुवाकाः सन्ति । नवमं यत् तत्र सप्तानुवाकाः । दशममन्त्यं मण्डलं यत् तत्र द्वादशानुवाकाः ॥ ३२ ॥

(13)

अथ मण्डलेषु सूक्तसङ्ख्यामाह—

(The number of Sūktas in each Anuvāka)

एकाधिका स्यान्नवतिः शतं च
वदन्ति वै मण्डलमादितो यत्।
चत्वारिंशत् त्रीणि (43) चाहुर्द्वितीयं
सूक्ते च षष्टिं (43)च तृतीयमाहुः॥ ॥ ३३ ॥

एकनवत्यधिकशतं सूक्तानि (191) भवन्तीत्यर्थः । द्वितीयं त्रिचत्वारिंशत्सूक्तम् । द्वे सूक्ते । द्व्यधिकषष्टिरिति यावत् ॥ ३३ ॥

अष्टापञ्चाशदपि (58) यच्चतुर्थं
सप्ताधिकाशीतिरतः (87) परं स्यात्।
पञ्चाधिका सप्ततिरुत्तरं (75) तु
चत्वारि वासिष्ठमथो शतं (104) च॥ ॥ ३४ ॥

अपि तु यच्चतुर्थं तत्राष्टाधिकपञ्चाशत् सूक्तानीत्याहः । अतः परं स्यात् । अतः पञ्चमं मण्डलम् । पञ्चधिका सप्ततिरुत्तरं तु । उत्तरं षष्ठम् । वासिष्ठं सप्तमं मण्डलं चतुरधिकं शतं सूक्तम् ॥ ३४ ॥

द्वे चैव सूक्ते नवतिं (92) च विद्या-
दथाष्टमं नवमं वै शतं (114) स्यात्।

चतुर्दश त्वाहुरथाधिकान्य-

प्याद्ये यदुक्तं दशमे (191)तथैव ॥ ॥ ३५ ॥

अष्टमम् । द्विनवतिः सूक्तानि यानि । नवमं मण्डलं शतं भवेत् । अथ यानि चतुर्दश सूक्तानि चात्राहुश्चतुर्दशाधिकशतं भवेदित्याहुरित्यर्थः अथाधिकानीति । वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः । चतुर्दश त्वाहुरथाधिकानीत्यन्ये पठन्ति । एकनवत्यधिकशतं सूक्तानि वदन्ति दशमे मण्डल इत्यर्थः ॥ ३५ ॥



(14)

(The total number of Sūktas in all the Anuvākas is 1,017 in Śākala recension, and 8 more in Bāshkala recension (1,025):

अथ सर्वमण्डलसूक्तसङ्ख्यामाह—

एतत् सहस्रं दश सप्त (1017) चैवाष्टावतो बाष्कलकेऽधिकानि (1025) ।

तान् पारणे शाकले शैशिरीये वदन्ति शिष्टा न खिलेषु विप्राः ॥ ॥ ३६ ॥

एतत् सूक्तजालं सप्तदशाधिकं सहस्रं सूक्तानि । वाष्कलके संहितापाठेऽतः शाकलादधिकान्यष्टौ सूक्तानि पञ्चविंशत्यधिकसहस्रमित्यर्थः । खिलेष्वनुवाकानेत्युक्तम् । तद्वैरस्पष्टत्वाय पुनराह । तानुक्तानुवकान् शाकले शैशिरीये पारायणे वेदपारतीरकर्मसमाप्तौ । करणे ल्युट् । अन्नादिमोक्षान्त-फलपारप्राप्तिहेतौ । शिशिरशब्दाद् गहादिछात् प्रोक्ताद्यण् स्वार्थे । शिष्टाः परमहर्षयो विप्रा मेधाविनः । शिष्टा अनुवाकान् अस्मिन् शाकल एव वदन्ति न खिलेष्वित्यर्थः । अतः खिलानामनुवाको नोक्त इति भावः । तान् पारणे शाकले शैशिरीया वदन्ति शिष्टा न खिलेषु विप्रा इति पठन्त्यन्ये ।। ३६ ।।

(The total number of Anuvākas in all the maṇḍalas.)

सर्वमण्डलमिलितानुवाकसङ्ख्यामाह—

पञ्चाशीति (85) दाशतय्येऽनुवाका दृष्टाः पुराणैर्ऋषिभिर्महात्मभिः ।
यस्तानृग्विद्वेद चैवाप्यधीते स नाकपृष्ठं भजते ह शश्वत् ।। ।। ३७ ।।

दाशतये । दशमण्डलयोगिनि वेदे । सङ्ख्याया अवयवे तयप् । ततः स्वार्थेऽण् । ऋग्वित् । ऋगर्थवत् । वेदतोऽधीते सः । वेदिताध्येता च । नाकपृष्ठं स्वर्गम् । शश्वत् सदा । भजते भजेत । लिङर्थे लट् । ह प्रसिद्धौ । इतोऽमुं लोकमेत्य तस्मान्न च्यवते हीत्यर्थः ।। ३७ ।।



(15)

(The total number of Adhyāyas (64) in all the ten maṇḍalas,
and the number of Vargas (2,006)

अध्यायानां चतुः षष्टि(64)(15)र्मण्डलानि दशैव (10) तु ।
वर्गाणां तु सहस्रे द्वे (2006) सङ्ख्याते च षळुत्तरे ॥ ॥ ३८ ॥

वर्गाः षडधिकद्विसहस्रमित्यर्थः ॥ ३८ ॥

(The total number of Sūktas excluding the Khila hymns (1,017)

सहस्रमेतत् सूक्तानां निश्चितं खैलिकैर्विना ।
दश सप्त च पठ्यन्ते संख्यातं वै पदक्रमम् ॥ ॥ ३९ ॥

खिलरहितसूक्तानि सप्तदशाधिकसहस्रम् । सङ्ख्यातम् । पुरा महर्षिभिरिति शेषः । वयमपि तच्छाकल्यदृष्ट इत्यादिना वक्ष्यामः ॥ ३९ ॥

एकर्च एकवर्गः (1) स्यादेकश्च (1) नवकस्तथा ।
द्वौ (2) वर्गौ तु द्वृचौ ज्ञेयौ त्र्यूनं तृचशतं (97) स्मृतम् ॥ ॥ ४० ॥

एकर्चः । जातवेदसे (1.99) । नवर्च एको वर्गः । आपो हि ष्ठा मयोभुवः (10,9) । द्वृचौ । अग्ने त्वं नो अन्तमः (5,24) । आ यहि वनसा सह (10,172) । तृचवर्गाः सप्तनवतिः । उत त्यं चमसं नवम् (1,20,6) इत्यादि ॥ ४० ॥

चतुष्कं शतमेकं (174) च चत्वारः सप्ततिस्तथा।
पञ्चकानां सहस्रं तु द्वे च सप्तोत्तरे शते (1207)॥ ॥ ४१ ॥

चतुर्ऋचवर्गजातं चतुःसप्तत्यधिकशतम्। यदङ्ग दाशुषे त्वम् (1,1,6) इत्यादि। सप्ताधिकशतद्वयसहस्रं पञ्चका वर्गाः अग्निमीळ (1,1,1) इत्यादि॥ ४१ ॥

त्रीणि शतानि षट्कानां (346)
चत्वारिंशत् षट् च वर्गाः।
(119) शतमूनविंशतिः (119) सप्तकानां
न्यूना षष्टिरष्टकानाम् (59)॥ ॥ ४२ ॥

अश्विना यज्वरीरिष (1,3) इत्यादि। सप्तकानाम्। एकोनविंशत्यधिकशतं सप्तर्चाः। यच्चिद्धि सत्य सोमपा (1,29) इत्यादि। एकोनषष्टिरष्टकवर्गाः। ऊनाषष्टिरष्टकानामित्यन्ये पठन्ति। इन्द्रं विश्वा अवीवृधन्नित्यादि (1,11)॥ ४२ ॥



(16)

ऋचां दश सहस्राणि ऋचां पञ्च शतानि च।
ऋचामशीतिः पादश्च पारणं संप्रकीर्तितम् ॥ ॥ ४३ ॥

(The total number of ṛks 10,580 for purposes of stylized recitation or pāraṇa; otherwise, the number is 10,417)

सहस्राण्यृचामिति सम्बन्धानुकरणं छन्दोऽनुवाकानुकरणं पारणं वेदसमापनकर्मर्षिभिः संप्रकीर्तितम्। पादश्च भद्रं न इति ॥ ४३ ॥

अर्धर्चानां सहस्राणामेकविंशतिकं तथा।
शतद्वयं तु द्वात्रिंशत् सपादं मुनिभिः पुरा ॥ ॥ ४४ ॥

(The total number of ardhaṛk : 21,232)

मुनिभिः पुरा। दृष्टमिति शेषः। द्वात्रिंशदधिकशतद्वयाधिकमेकविंशतिसहस्रमर्धर्चाः पादश्चैक इत्यर्थः ॥ ४४ ॥

शाकल्यकदृष्टो पदलक्षमेकं
सार्धं च वेदे त्रिसहस्रयुक्तम्।
शतानि चाष्टौ दशकद्वयं च
पदानि षट् चेति हि चर्चितानि ॥ ॥ ४५ ॥

(The total number of words (charchita padāni): 153826)

शाकल्यदृष्टे वेदे चर्चितान्यभ्यस्तान्यधीतानि पदानि षड्विंशत्यधिकाष्टशतयुक्तत्रिसहस्राधिक-पञ्चाशत्सहस्राधिकशतसहस्रमित्यर्थः ।। ४५ ।।



(17)

अथ क्रमसङ्ख्यामाह—

एकं च शतसहस्रं दश च सहस्राणि सप्त
शतानि चर्चा पदानि ज्ञेयानि पदानि चान्यानि चत्वारि ।
चत्वारि वाव शतसहस्राणि
द्वात्रिंशच्चाक्षरसहस्राणि द्वात्रिंशच्चाक्षरसहस्राणि ।। ।। ४६ ।।

(The total number of letters (aksharas): 4,3,2,000)

This is also the number given in Śatapatha-brāhmaṇa (21 10,4,2,23), which relies on Dvādaśa-bṛhatī-sahasra (1200 x 36).

॥ इत्यनुवाकानुक्रमणी समाप्ता ॥

चर्चापदानि क्रमरूपेणाभ्यस्तानि पदानीत्यतर्थः । चतुरधिकसप्तशतदशसहस्राधिकलक्षं क्रमसङ्ख्येत्यर्थः । वावेति खल्वित्यर्थः । द्वात्रिंशत्सहस्राधिकचतुर्लक्षमक्षराणीत्यर्थः । द्विरुक्तिः समाप्तिज्ञापनार्था । एष वा ऋग् एष वा अर्धर्च एष वै पदम् एष वा अक्षरमित्यादि सर्वेषां ब्रह्मरूपत्वेनोक्तेरारण्यके । अत्रापि सर्वं सम्यक् सङ्ख्यातं भगवता शौनकेन बह्वृचसिंहेन वेदितव्यम् ॥४६॥

॥ इति षड्गुरुशिष्यविरचितानुवाकानुक्रमणीवृत्तिः समाप्ता ॥

★★ ★ ★ ★ ★★



ओं श्रीदेवायनमः॥ ओं श्रीदेवायनमः॥ ओं श्रीदेवायनमः॥ ओं श्रीदेवायनमः॥

Appendix - II

ŚAUNAKA'S ĀRSHĀNUKRAMAṆI

अथार्षानुक्रमणी

प्रथमं मण्डलम्

ऋग्वेदमखिलं ये हि द्रष्टारो मुनिपुङ्गवाः ।
तदनुक्रमणायाहं नमामि परमेश्वरम् ॥ १ ॥

अत्राग्निमीळ इत्यादि प्रथमं मण्डलं प्रति ।
शतर्चिनस्तु विज्ञेया ऋषयः सुखसिद्धये ॥ २ ॥

The Śatarchins are sixteen seers to each of whom a hundred ṛks are ascribed. They are Madhuchchhanda, Medhātithi, Śunahśepa, Hiraṇya-stūpa, Kaṇva, Praskaṇva, Savya, Nodhā, Parāśara, Gotama, Kutsa, Kaśyapa, Kakshīvān, Paruchchepa, Dīrghatamas, and Agastya (śatānām drashtṛtvāt).

(The Sūkta numbers are indicated within brackets).

तेषां पूर्व्वो मधुच्छन्दा मेधातिथिरनन्तरः ।
शुनःशेपस्तृतीयोऽयं हिरण्यस्तूप उत्तरः ॥ ३ ॥

कण्वस्तु पञ्चमः षष्ठः प्रस्कण्वः सव्य उत्तरः ।
नोधाः पराशरश्चान्यो गोतमः कुत्स उत्तरः ॥ ४ ॥

कश्यपस्त्वथ कक्षीवान् परुच्छेपस्तदुत्तरः ।
दीर्घतमास्ततोऽगस्त्यः षोडशैते शतर्चिनः ॥ ५ ॥

ऋचां शतानि दृष्टत्वादेत एव शतर्चिनः ।
जेतादीनां तु तन्नास्ति तस्मान्नैते शतर्चिनः ॥ ६ ॥

तत्र त्वादित आरभ्य सूक्तानां दशकं प्रति ।
वैश्वामित्रो मधुच्छन्दा ऋषिरित्यवगम्यताम् ॥ ७ ॥

(Madhuchchanda of Viśvāmitra lineage)

(11) इन्द्रं विश्वा इति त्वस्य जेता तस्य सुतो मुनिः ।
(12) अग्निं दूतमुपक्रम्य सूक्तद्वादशकं प्रति ॥ ८ ॥

(Jetā, son of Indra-Viśvā)

काण्वो मेधातिथिर्नाम मुनिरित्यवगम्यताम् ।
(24) कस्य नूनमुपक्रम्य सूक्तानां सप्तकं प्रति ॥ ९ ॥

(Kaṇva's son is Medhātithi)

आजीगर्त्तिः शुनःशेप ऋषिरित्यवगम्यताम् ।
अयं तु देवराताख्यो वैश्वामित्रश्च कृत्रिमः ॥ १० ॥

(Devarāta, adopted son of Viśvāmitra;
also Śunahśepa, son of Ajīgarta)

(31) त्वमग्न इत्युपक्रम्य सूक्तानां पञ्चकं प्रति ।
हिरण्यस्तूपनामायमृषिरङ्गिरसः सुतः ॥ ११ ॥

(Hiraṇyastūpa, son of Aṅgiras)

(36) प्र वो यह्वमुपक्रम्य सूक्तानामष्टकं प्रति ।
घोरस्य पुत्रः कण्वोऽयमृषिरित्यवगम्यताम् ॥ १२ ॥

(Kaṇva, son of Ghosha)

(51) अभित्यं मेषमित्यादिसूक्तानां सप्तकं प्रति ।
सव्यो हि नामाङ्गिरस ऋषिरित्यवगम्यताम् ॥ १३ ॥

(Savya of the Aṅgiras lineage)



(५८) नू चित्सहोजा इत्यादि सूक्तानां सप्तकं प्रति ।
गोतमस्य सुतो नोधा ऋषिरित्यवगम्यताम् ॥ १४ ॥

(Nodhā, son of Gotama)

(65) पश्वा न तायु मित्यादिसूक्तानां नवकं प्रति ।
शाक्त्यः पराशरो नाम ऋषिरित्यवगम्यताम् ॥ १५ ॥

(Parāśara, son of Śakti)

(74) उपप्रयन्त इत्यादिसूक्तानां विंशतिं प्रति ।
राहूगणो गोतमोऽयमृषिरित्यवगम्यताम् ॥ १६ ॥

(Gotama Rāhūgaṇa)

(94) इमं स्तोममुपक्रम्य सूक्तानां पञ्चकं प्रति ।
कुत्सो हि नामाङ्गिरस ऋषिरित्यवगम्यताम् ॥ १७ ॥

(Kutsa of the Aṅgīras lineage)

(99) जातवेदस इत्यस्मिन् मारीचः कश्यपो मुनिः ।

(100) स यो वृषेति सूक्तस्य ह्युषयो वार्षागिराः ॥ १८ ॥

(Kaśyapa, the son of Marīcha)

ऋज्राश्वः प्रथमस्तेषां भयमानसुराधसौ ।

सहदेवोऽम्बरीषश्च तेऽत्र सूक्ते प्रकीर्त्तिताः ॥ १९ ॥

(Vārshāgiras headed by Ṛjrāśva)

(105) चन्द्रमा इति सूक्तस्य चित आप्त्योऽथवा ऋषिः ।

(116) नासत्याभ्यामुपक्रम्य सूक्तेष्वेकादशस्वथ ॥ २० ॥

(Chita Āpya; Kākshīvan, son of Dīrghatamas)

कक्षीवान् दैर्घतमस उशिक्सूनुः स एव च ।

भावयव्यस्तु राजायमृषिरा गधिते त्यृचः **(126,6)** ॥ २१ ॥

(Bhāvayavya)

तद्भार्य्या रोमशा नामोपोत्तमस्या उपोत्तमे ।

अग्निं होतारमित्यादिसूक्तेष्वेव त्रयोदश ॥ २२ ॥

(Romaśa, the wife of Bhāvayavya)

दैवोदासिः परुच्छेपो राजैवायमृषिस्ततः ।
(140) वेदिषदे प्रभृतीनां सूक्तानां पञ्चविंशतेः ॥ २३ ॥

(Paruchchepa, the son of Divodāsa)

दीर्घतमा नामौचथ्य ऋषिरित्यवगम्यताम् ।
कया शुभेतिसंवाद इन्द्रादीनां हि तत्र तु ॥ २४ ॥

(Dīrghatamas, the son of Uchathya)

(165) कया शुभेत्युपक्रम्य युजामासामृचां पुनः ।
एकादश्याश्चायमिन्द्र ऋषिरित्यवगम्यताम् ॥ २५ ॥

(Indra, the seer)

ऋषयो मरुतस्तत्र तृतीयाद्ययुजामृचाम् ।
सूक्तस्यान्त्ये तृचेऽगस्त्य ऋषिरित्यवगम्यताम् ॥ २६ ॥

(The Maruts)

अगस्त्य एव तन्वादिमित्रावरुणयोः सुतः । (166)
षड्विंशतेश्च सूक्तानामृषिरित्यवगम्यताम् ॥ २७ ॥

(Agastya, the son of Mitrāvaruṇa)

इन्द्रागस्त्ययोः संवादो न नूनमिति तत्र तु । (170)
प्रथमायास्तृतीयाया ऋचोरिन्द्र ऋषिः स्वयम् ॥ २८ ॥

(Indra and Agastya)

उभौ वाथ चतुर्थ्यास्तु द्वयोरन्यतरोऽथवा ।
(179) पूर्व्वीरिति च सूक्तस्य संवादस्य द्वृचास्त्रयः ॥ २९ ॥

लोपामुद्रा द्वृचे पूर्व्वे अगस्त्यो मध्यमे द्वृचे ।
अन्तेवासी ब्रह्मचारी सूक्तस्यान्ते द्वृचे मुनिः ॥ ३० ॥

(Lopāmudrā, Agastya and student)

इति प्रथमं मण्डलम् ।



अथ द्वितीयं मण्डलम् ।

मध्यमेष्वृषयो ज्ञेया मण्डलेष्वथ मध्यमाः ।
(1) तत्र त्वमग्न इत्यादिद्वितीयं मण्डलं प्रति ॥ १ ॥

ऋषिर्गृत्समदो नाम विज्ञेयः स च शौनकः ।
औरसः शुनहोत्रस्य शुनकस्यैव कृत्रिमः ॥ २ ॥

(Gṛtsamada, son of Śunahotra and adopted by Śunaka)

तस्मादाङ्गिरसः पूर्व्वं पश्चात्स भृगुतां गतः ।
(4) हुवे व इति सूक्तानां तत्रापि च चतुष्टये ॥ ३ ॥

सोमाहुतिर्भार्गवोऽयमृषिरित्यवगम्यताम् ।
(27) इमा गिर उपक्रम्य सूक्तानां त्रितयं प्रति ॥ ४ ॥

ऋषिः कूर्म्मो गार्त्समदः स्वयं गृत्समदोऽथ वा ॥ ५ ॥

(Gṛtsamada, originally of Aṅgiras lineage
and by adoption Bhṛgu lineage)

इति द्वितीयं मण्डलम् ।

अथ तृतीयं मण्डलम् ।

(1) सोमस्य मेत्युपक्रम्य तृतीयं मण्डलं प्रति ।
विश्वामित्र इति ज्ञेयः स च गाथिसुतः स्मृतः ॥ १ ॥

(Viśvāmitra, son of Gāthin)

(13) ऋषभो द्वे प्र वः सूक्ते विश्वामित्रसुतो जगौ ।
(15) विपाजसेति सूक्ते द्वे कात्योत्कील ऋषिर्जगौ ॥ २ ॥

(Ṛshabha, son of Viśvāmitra)

(17) समिध्यमानो द्वे सूक्ते वैश्वामित्रः कतो जगौ ।
(19) अग्निं होतारमारभ्य गाथी नाम स कौशिकः ॥ ३ ॥

(Kata, son of Viśvāmitra-Gāthin)

सूक्तान्यपश्यश्चत्वारि सूक्ते निर्मथिते परे ।
देवश्रवो देवरातावृषी एतौ हि भारतौ ॥ ४ ॥

(Devaśrava and Devarāta of the Bharata clan)



(31) कुशिकः शासदित्यस्मिन्निषीरथसुतो मुनिः ।
अथवा मण्डलद्रष्टा विश्वामित्रो यथा श्रुतिः ॥ ५ ॥

(Kuśika or Viśvāmitra)

(33) प्र पर्व्वतानामित्यस्मिन् विपाडित्येवमादिभिः ।
नदीभिः सह संवादो विश्वामित्रस्योत्तितीर्षोः ॥ ६ ॥

(Viśvāmitra and Rivers)

अष्टमी दशमी षष्ठी चतुर्थी च नदीवचः ।
शिष्टा या नवसूक्तस्य विश्वामित्रवचांसि ताः ॥ ७ ॥

(36,10) अस्मे प्रयन्धीत्येतस्यां घोर आङ्गिरसो मुनिः ।
निर्दहेच्छस्यमानेऽपि श्रूयते सा न शस्यते ॥ ८ ॥

(Ghora Āṅgiras)

(38) अभि तष्टेव सूक्तस्य वैश्वामित्रः प्रजापतिः ।
वाच्यो वा स उभौ वा तौ विश्वामित्रोऽथवा श्रुतेः ॥ ९ ॥

(Prajāpati, son of Viśvāmitra)



(54) इमं मह उपक्रम्य सूक्तानां त्रितयं प्रति ।
अयमेव ऋषिर्विद्यादुक्तगोत्रः प्रजापतिः ।
भार्गवो जमदग्निर्वा मण्डलान्त्ये तृचेऽप्यृषिः ॥ १० ॥

(Prajāpati, Bhārgava or Jamadagnī)

इति तृतीयं मण्डलम् ।



अथ चतुर्थं मण्डलम् ।

(1) त्वां ह्यग्ने सदमित्यादि चतुर्थं मण्डलं प्रति ।
गौतमो वामदेवोऽयमृषिरित्यवगम्यताम् ॥ १ ॥

(Vāmadeva of Gotama lineage)

अयं पन्थास्तु संवाद इन्द्रादेः सूक्तमत्र तु ।
(18) अयं पन्था इति त्वस्या ऋच इन्द्रः स्वयं मुनिः ॥ २ ॥

(Indra)

वामदेवस्तु पञ्चानामर्द्धर्चानां ततः परम् ।

(18,4) न हि न्वस्या दिसप्तानामर्द्धर्चानां तथादिति: ॥ ३ ॥

(Vāmadeva)

(18,8) ममचन त्वेत्यादीनामृचां षणान्त एव तु ।

वामदेव ऋषिर्विद्यादत्राप्येवं विशेषतः ॥ ४ ॥

(Vāmadeva)

त्रसदस्युः पौरुकुत्स्य ऋषिः सूक्ते मम द्विता । (42)

(43) क उ श्रवदिति त्वस्य तथा तस्योत्तरस्य च ।

(Trasadasyu, son of Purukutsa)

पुरुमील्होऽजमील्हश्च सौहोत्रौ तावृषी सह ॥ ५ ॥

(Purumīḍha, Ajamīḍha)

इति चतुर्थं मण्डलम् ।



अथ पञ्चमं मण्डलम् ।

अबोध्यग्निरूपक्रम्य पञ्चमं मण्डलं प्रति ।
पुत्राद्यैः सह भौमोऽत्रिर्मुनिरित्यवगम्यताम् ॥ १ ॥

(Atri, son of Bhūmā; and sons of Atri)

अत्र त्वनुक्तगोत्रा ये ज्ञेयास्त्वत्रिसुता इति ।
(1) अबोध्यग्निरितित्वस्मिन्नृषी बुधगविष्ठिरौ ॥ २ ॥

(2) कुमारमिति चैतस्मिन् कुमारो वा वृशोऽथवा ।
वृशो जार इति ज्ञेय उभौ वात्र समुच्चितौ ॥ ३ ॥

(Kumāra or Vṛśa)

(2.2) कमेतमिति चैतस्यां तथा विज्योतिषेत्यृचि । (2,9)
वृश एव ऋषिर्विद्यान्न विकल्पसमुच्चयौ ॥ ४ ॥

(Vṛśa)

(3) त्वमग्न इति सूक्तेषु चतुष्केषु वसुश्रुतः ।
(7) सखायः सं व इत्यस्मिन्निषस्तस्योत्तरेऽपि च ॥ ५ ॥

(9) त्वामग्न इति चैतस्मिन् गयस्तस्योत्तरेऽपि च ।
(11) जनस्य गोपाः सूक्तेषु चतुष्केषु सुतम्भरः ॥ ६ ॥

(Gaya)

(15) प्र वेधस इति त्वस्मिन् धरुणोऽङ्गिरसः सुतः ।

(16) बृहद्वय इति त्वस्मिन् पुरुस्तस्योत्तरेऽपि च ॥ ७ ॥

(Dharuṇa, son of Aṅgiras)

(18) प्रातरग्निरिति तस्मिन्मृक्तवाहा द्वितो मुनिः ।

(19) अभ्यवस्यायमग्ने च सूक्तयोरेतयोर्मुनिः ॥ ८ ॥ (20)

(Dvita)

वव्रिर्नाम मुनिः पूर्वे प्रयस्वन्तस्तदुत्तरे ।

(21) मनुष्यत्त्वेति सूक्तस्य ससो नाम मुनिः स्मृतः ॥ ९ ॥

(Vavri; Sasa)

(22) प्र विश्वसामन्नित्यस्य विश्वसामेत्यृषिः स्मृतः ।

(23) अग्ने सहन्तमित्यस्य द्युम्नोऽयं विश्वचर्षणिः ॥ १० ॥

(Viśvasāma and Dyumna)

(24) अग्ने त्वं सूक्तमेकर्चा द्वैपदा विद्यते क्रमात् ।

विप्रवन्धुः श्रुतवन्धुः सुबन्धुर्वन्धुरित्यमी ॥ ११ ॥

(The Bandhu brothers : Viprabandhu, Śrutabandhu and Subandhu, children of Gopāyana)

गौपायना इमे ज्ञेया अथवा नौपायना इति ।

(25) ऋषिरच्छा व इत्यस्मिन्नुत्तरे च वसूयवः ॥ १२ ॥

(27) अनस्वन्तेति सूक्तस्य त्रिवृष्णपुरुकुत्सजौ ।

अरुणत्रसदस्यू द्वावश्वमेधश्च भारतः ॥ १३ ॥

(Aruṇa and Trasadasyu, children of Trivṛshṇa and Purukutsa)

अन्त्यानां तिसृणामेषां पूर्व्वासामितरौ सह ।

अथवा भौम एवात्रिस्त्वृषिरत्र न शस्यते ॥ १४ ॥

(Atrī, son of Bhūma)

दानक्रियायमेकस्य दातृनदातृता यतः ।

(28) समिद्धो अग्निरित्यस्मिन् विश्वावारात्रिगोत्रजा ॥ १५ ॥

(Viśvavārā of Atri lineage)

(29) त्र्यर्य्यमेत्यस्य सूक्तस्य गौरिवीतिः स शक्तिजः ।

(30) कस्य वीरः क इत्यस्य बभ्रुर्नाम ऋषिः स्मृतः ॥ १६ ॥

(Gaurivīti, son of Śakti; Babhru)

(31) इन्द्रो रथाय सूक्तेऽस्मिन्नवस्युर्नाम संस्मृतः ।

(32) अदर्दरुत्समित्यस्य गातुर्नाम मुनिः स्मृतः ॥ १७ ॥

(Avasyu)

प्राजापत्यः संवरणः सूक्ते महि महेजगौ । (33)

प्रभुवसुराङ्गिरसो यस्ते साधिष्ठ इत्युभे ॥ १८ ॥ (35)

(Samvaraṇa, son of Prajāpati)

(37) सम्भानुनेत्युपक्रम्य सूक्तानां सप्तकं प्रति ।

अत्रिरेव स्वयं भौम ऋषिरित्यवगम्यताम् ॥ १९ ॥

(Atri, son of Bhūma)

(44) तं प्रत्नथेति सूक्तेऽस्मिन्नवत्सारो हि काश्यपः ।

अन्यैश्च दशभिः साकमृषिरित्यवगम्यताम् ॥ २० ॥

(Avatsāra, son of Kaśyapa)



सदापृणो यजतोश्च बाहुवृक्तः सुतम्भरः ।
श्रुतवित्तर्य्यनामा स एवावदो मनसः ॥ २१ ॥

(Bāhuvṛkta, Śrutavit)

क्षत्रसध्री इमे चान्ये दृष्टलिङ्गा हि सूक्तके ।
(45) विदा दिव इति त्वस्मिन्नृषिरेव सदापृणः ॥ २२ ॥

(Sadapṛṇa)

(46) हयो न विद्वानित्यस्मिन् प्रतिक्षत्र ऋषिः स्मृतः ।
(47) प्रयुञ्जतीति सूक्तेऽस्मिन्नृषिः प्रतिरथः स्मृतः ॥ २३ ॥

(Pratikshatra and Pratiratha)

(48) कदू प्रियायसूक्तेऽस्मिन् देवं व इति चोत्तरे । (49)
ऋषिः क्रमेण विज्ञेयः प्रतिभानुः प्रतिप्रभः ॥ २४ ॥

(Pratibhānu and Pratiprabha)

(50) विश्वो देवस्य सूक्तस्य तथैवाग्ने सुतस्य च । (51)
उभयोरनयोरेष स्वस्त्यात्रेय इति स्मृतः ॥ २५ ॥

(Svasti, son of Atri)

(52) प्र श्यावाश्व उपक्रम्य दशसूक्तेष्वतः परम् ।
श्यावाश्वो मरुतां स्तोता मुनिरित्यवगम्यताम् ॥ २६ ॥

(Śyāvāśva)

(62) ऋतेन ऋतमित्यस्य सूक्तेऽयं श्रुतविन्मुनिः ।
(63) ऋतस्य गोपावित्यस्मिन् वरुणं व इतीह च ॥ २७ ॥ (64)

अर्चनाना ऋषिर्विद्यादयश्चिकेतेति सूक्तयोः । (65)
रातहव्योऽथ यजतो बलित्थेति च सूक्तयोः ॥ २८ ॥ (67)

(Archanānā; Rātahavya)

उरुचक्रिर्बाहुवृक्तः पौरश्चैव द्वयोर्द्वयोः ।
(75) प्रतिप्रियतमं सूक्तमवस्युर्दृष्टवान्मुनिः ॥ २९ ॥

(Avasyu)

अत्रिरेव मुनिर्भौम आभात्यग्निरिति द्वयोः । (76)
(78) अश्विनावेह सूक्तस्य सप्तवध्रिस्त्वृषिः स्मृतः ॥ ३० ॥

(Atri-bhauma; Saptavadhri)

सत्यश्रवा ऋषिर्नाम महे नो अद्यसूक्तयोः । (79)
(81) युञ्जते मन इत्यत्र श्यावाश्वः सूक्तयोर्ऋषिः ॥ ३१ ॥

(Satyaśravas and Śyāvāśva)

(83) अत्रिरच्छा वदेत्यादिचतुःसूक्तेष्वृषिः स्वयम् ।
मण्डलान्त्यस्य सूक्तस्य प्र व इत्येवयामरुत् ॥ ३२ ॥ (87)

(Atri)

इति पञ्चमं मण्डलम् ।



अथ षष्ठं मण्डलम् ।

त्वं ह्यग्न इत्युपक्रम्य षष्ठाख्यं मण्डलं प्रति ।
बार्हस्पत्यो भरद्वाज ऋषिरित्यवगम्यताम् ॥ १ ॥

(Bharadvāja, son of Bṛhaspati)

तत्राप्यन्ये भरद्वाजाद्वक्ष्यन्ते येऽपवादतः ।
तेषामनुक्तगोत्रास्तु विज्ञेयास्तत्सुता इति ॥ २ ॥

(15) इममू षु व इत्यस्य सूक्तस्याङ्गिरसः सुतः ।
वीतहव्यो विकल्पेन मुनिरित्यवगम्यताम् ॥ ३ ॥

(Vītahavya)

(31) अभूरेक स्त्वपूर्व्व्येति सुहोत्रः सूक्तयोर्ऋषिः । (32)

(33) शुनहोत्रो य ओजिष्ठः सश्च त्वेचेति सूक्तयोः ॥ ४ ॥ (34)

(Suhotra; Śunahotra)

(35) कदा सत्राम दासस्तु सूक्तयोरनयोर्नरः । (36)

(44) ऋषिर्यो रयि व स्त्वादिसूक्तानां त्रितयं प्रति ॥ ५ ॥

(47) यज्ञा यज्ञीयसूक्ते च शंयुः पुत्रो बृहस्पतेः ।

(48) स्वादुष्किलायमित्यस्य गर्गो नाम ऋषिः स्मृतः ॥ ६ ॥

(Śamyu, son of Bṛhaspati; Garga)

(49) स्तुषे जनमुपक्रम्य चतुःसूक्तेष्वयं मुनिः ।
ऋजिश्वा ये सुहोत्राद्याः पौत्राश्चैते बृहस्पतेः ॥ ७ ॥

(Ṛjiśvā, Suhotra and others,
grandchildren of Bṛhaspati)

(75) जीमूतसूक्ते पायुस्तु भारद्वाज ऋषिः स्मृतः ।
उक्तापवादविषयादितरत्रात्र मण्डले ।
स्वयमेव भरद्वाज एवं सर्व्वत्र गम्यताम् ॥ ८ ॥

(Bhāradvāja Pāyu)

इति षष्ठं मण्डलम् ।

अथ सप्तमं मण्डलम् ।

अग्निं नर इति त्वेतत्सप्तमं मण्डलं प्रति ।
ऋषिर्वसिष्ठो विज्ञेयो मित्रावरुणयोः सुतः ॥ १ ॥

(Vasishṭha, son of Mitrāvaruṇa)

(32,26) इन्द्र क्रतुं न इत्यस्मिन्नर्द्धर्चे मो षु सूक्तके । (32)
वसिष्ठपुत्रः शक्तिर्वा वसिष्ठो वा स्वयं मुनिः ॥ २ ॥

(Śakti, Vasishṭha's son; or Vasishṭha himself)

(33) श्वित्यञ्च इति सूक्तस्य नवानामादितस्त्वृचां ।
वसिष्ठ एव पश्चानां विद्युतो ज्योतिरित्यृचाम् ॥ ३ ॥ (33,10)

(Vasishṭha)

वसिष्ठपुत्रा इन्द्रो वा ह्यृषिरित्यवगम्यताम् ।
(101) तिस्रो वाच इति त्वस्मिन् पर्ज्जन्यायेति चोत्तरे । (102)
अग्निपुत्रः कुमारो वा वसिष्ठो वा स्वयं मुनिः ॥ ४ ॥

(Indra or Vasishṭha's sons; Kumāra,
the son of Agni; or Vasishṭha himself)

इति सप्तमं मण्डलम् ।

अथाष्टमं मण्डलम् ।

(1) मा चिदन्यदितित्वेतदष्टमं मण्डलं प्रति ।
प्रगाथाद्यृषयो ज्ञेयाः शृणु वक्ष्यामि तानिह ॥ १ ॥

(Pragātha)

अनुक्तगोत्रो यस्त्वत्र मण्डले लक्ष्यते मुनिः ।
स तु काण्व इति ज्ञेयः प्राङ्गत्स्यात्सांमदादृषेः ॥ २ ॥

(The sons of Kāṇva lineage)

मण्डलाद्यद्वृचस्यायं प्रगाथो घोरजो मुनिः ।
स हि घोरस्य कण्वस्य भ्राता सन् पुत्रताङ्गतः ॥ ३ ॥

(Pragātha, who was the brother of Ghora-Kaṇva, was adopted as his son)

मेधातिथिः परस्तस्मात्स मेध्यातिथिना सह ।
(1) यच्चिद्धि त्वेत्यृचामासामृषिरासप्तविंशतेः ॥ ४ ॥

(Medhātithi)

(1,30) स्तुहि स्तुहीत्याद्यानामृचां चतसृणामृषिः ।
प्लयोगपुत्र आसङ्गस्तस्य पत्नी तु शश्वती ॥ ५ ॥

(Āsaṅga, the son of Playoga;
Śaśvatī was Āsaṅga's wife)

(1,34) अन्वस्य स्थूरमित्यस्याः सा च त्वङ्गिरसः सुता ।
मेधातिथिप्रियमेधावृषी सूक्ते इदं वसो ॥ ६ ॥ (2)

(Daughter of Aṅgiras; Medhātithi and
Priyamedha of Āṅgiras lineage)

आङ्गिरसः प्रियमेधस्तत्र मेधातिथिर्मुनिः ।
(2,41) शिक्षा वि भिन्दो इत्यस्य हृचस्यान्त्यस्य केवलम् ॥ ७ ॥

(Priyamedha and Medhātithi)

(3) पित्रा सुतस्य सूक्तस्य मेधातिथिऋषिः स्मृतः ।
(4) यदिन्द्र प्रागपाक् सूक्ते देवातिथिर्मुनिः स्मृतः ॥ ८ ॥

(Medhātithi; Devātithi)

(5) दूरादिहेव सूक्तस्य ऋषिर्ब्रह्मातिथिस्ततः ।
(6) महानिन्द्रो य इत्यस्मिन् वत्सो नाम ऋषिः स्मृतः ॥ ९ ॥

(Brahmātithi; Vasta)

(7) प्र यद्वस्त्रिष्टुभं सूक्ते पुनर्वत्स ऋषिः स्मृतः ।

(8) आ नो विश्वाभिरित्यस्मिन् सध्वंसो नाम संस्मृतः ।। १० ।।

(Vatsa and Sadhvamsa)

(9) आ नूनमश्विनेत्यस्मिञ्छशकर्ण ऋषिः स्मृतः ।

(10) यत्स्थ इत्यस्य सूक्तस्य प्रगाथो नाम संस्मृतः ।। ११ ।।

(Śaśakarṇa and Pragātha)

(11) त्वमग्ने व्रतपाः सूक्ते वत्स एव मुनिः स्मृतः ।

(12) ऋषिर्य इन्द्र सूक्तस्य पर्व्वतो नाम संस्मृतः ।। १२ ।।

(Vatsa and Parvata)

(13) इन्द्रः सुतेषु सूक्तस्य नारदो मुनिरेव सः ।

(14) यदिन्द्राहमिति त्वस्मिंस्तमूमित्युत्तरेऽपि च ।। १३ ।। (15)

(Nārada)



गोषूक्ती चाश्वसूक्ती च ऋषी एतौ काण्वायनौ ।

(16) प्र सम्राजमिति त्रीणि सूक्तानीरिम्बिठिर्जगौ ॥ १४ ॥

(Kāṇvāyana)

(19) तं गूर्द्धयेति चत्वारि ऋषिः सूक्तानि सोभरिः ।

(23) ईळिष्व हीत्युपक्रम्य चतुःसूक्तेष्वतः परम् ॥ १५ ॥

(Sobhari)

ऋषिर्विश्वमना नाम स वैयश्व इति स्मृतः ।

एषां चतुर्थे सूक्ते तु व्यश्वो वाङ्गिरसो मुनिः ॥ १६ ॥

(Viśvamanā, son of Vyaśva)

(27) अग्निरुक्थे उपक्रम्य पञ्चसूक्तेष्वतः परम् ।

मनुर्वैवस्वतो नाम ऋषिरित्यवगम्यताम् ।

एषां तु मध्यमे सूक्ते मारीचो वाथ कश्यपः ॥ १७ ॥

(Manu, son of Vivasvān; Kaśyapa)

मेधातिथिस्तु प्रकृतानि सूक्तं (32)

मेध्यातिथिस्तत्र वयङ्गसूक्तम् । (33)

नीपातिथिः सूक्तमथेन्द्र याहि (34)

तृचं तथान्त्यं वसुरोचिषस्य ॥ १८ ॥

(Medhātithi, Medhyātithi and Nīpātithi)

सहस्रमेतेऽङ्गिरसो ह्यपश्यं

(35) स्ततोऽग्निनेन्द्रेण ततोऽवितेति । (36)

चतुर्षु सूक्तेष्वत उत्तरेषु

श्यावाश्वनामा मुनिरत्रिगोत्रः ॥ १९ ॥

(The Aṅgirasas, Śyāvāśva of Atri lineage)

(39) अग्निमस्तोषि सूक्तेषु नाभाकोऽथ चतुर्ष्वृषिः ।

एषां चतुर्थे सूक्ते वा तस्य चान्त्ये तृचेऽथवा ॥ २० ॥

(Nābhāka)

आत्रेयस्त्वर्चनाना वा मुनिरित्यवगम्यताम् ।

(43) इमे विप्रस्यसूक्तेऽस्मिन् समिधाग्निमितीह च ॥ २१ ॥ (44)

(Archanānā Atreya)

विरूपोऽङ्गिरसः पुत्रस्त्रिशोकस्तत उत्तरे ।

(46) सूक्ते त्वावत इत्यस्मिन्नश्वपुत्र ऋषिर्वशः ॥ २२ ॥

(Virūpa of the Aṅgiras lineage; Vaśa, son of Aśva)

(47) महि वो महतां सूक्ते ह्याप्त्यस्त्रित ऋषिः स्मृतः ।

(48) स्वादोरभक्षिसूक्तस्य प्रगाथाख्य ऋषिः स्मृतः ॥ २३ ॥

(Āptya-trita; Pragātha)

(60) अग्न आयाहि सूक्तस्य तथा तस्युत्तरस्य च ।

भर्गः प्रगाथपुत्रोऽयमृषिरित्यवगम्यताम् ॥ २४ ॥

(Bharga, son of Pragātha)

प्रगाथ एव प्रो अस्मै सूक्तेष्वेषु चतुर्ष्वृपिः ।

(66) तरोभिरिति सूक्तस्य प्रगाथतनयः कलिः ॥ २५ ॥

(Pragātha; Kali, son of Pragātha)

सूक्ते त्विह त्यान्न्विति सांमदो वा (67)

मत्स्यो मुनिस्तत्सहचारिणी वा ।

जालेन नद्धा बहवो हि मत्स्या

मान्योऽथ मैत्रावरुणिः स्वयं वा ॥ २६ ॥

(Mātsya and his wife)

(68) आ त्वा रथमिति त्वस्य प्र प्र वस्त्रिष्टुभस्य च । (69)

आङ्गिरसः प्रियमेध ऋषिरित्यवगम्यताम् ॥ २७ ॥

(Priyamedha, descendent of Aṅgiras)

(70) यो राजेति च सूक्तस्य त्वं न इत्युत्तरस्य च । (71)

आङ्गिरसः पुरुहन्मा मुनिरत्र यदुत्तरम् ॥ २८ ॥

(Puruhanmā of Aṅgiras lineage)

तत्र त्वन्यतरोऽयं वा सुदीति पुरुमील्हयोः ।

(72) हविष्कृणुध्वमित्यस्मिन् प्रागाथो हर्य्यतो मुनिः ॥ २९ ॥

(Purumīḍha; Haryata, son of Pragātha)

(73) उदीराथामिति त्वस्य तथा तस्योत्तरस्य च ।

आत्रेयोऽयं गोपवन ऋषिरित्यवगम्यताम् ॥ ३० ॥

(Gopavana-Ātreya)



आत्रेयः सप्तवध्रिर्वा तयोः पूर्वस्य गम्यताम् ।

(75) ऋषिर्युक्ष्वा हि सूक्तस्य विरूपो वाङ्गिरसः सुतः ॥ ३१ ॥

(Saptavardhi-Ātreya; Virūpa of Aṅgiras lineage)

(76) इमं नु सूक्तमारभ्य त्रिषु सूक्तेष्वतः परम् ।

काण्वः कुरुसुतिर्नाम ऋषिरित्यवगम्यताम् ॥ ३२ ॥

(Kurusuti, son of Kaṇva)

(79) अयं कृत्नुरिति त्वस्मिन् कृत्नुर्नाम भृगोः सुतः ।

(80) न ह्यन्यमिति सूक्तेऽस्मिन्नेकद्यूर्नौधसो मुनिः ॥ ३३ ॥

(Kṛtnu, son of Bhṛgu; Ekadyūh)

(81) आ तू न इत्युपक्रम्य त्रिषु सूक्तेष्वतः परम् ।

कुसीदी नाम काण्वोऽयमृषिरित्यवगम्यताम् ॥ ३४ ॥

(Kusīdī, of Kaṇva lineage)

(84) प्रेष्ठं व इति सूक्तस्य काव्योऽयमुशना मुनिः ।

(85) आ मे हव मुपक्रम्य त्रिषु सूक्तेष्वतः परम् ॥ ३५ ॥

(Kāvya-uśanā)

आङ्गिरसः कृष्णनामा मुनिरित्यवगम्यताम् ।
एषान्तु मध्यमे सूक्ते कार्ष्णिर्वा विश्वको मुनिः ॥ ३६ ॥

(Kṛshṇa, son of Aṅgirasa, probably Ghora-Aṅgirasa)

उत्तरे च वसिष्ठस्य पुत्रो वा द्युम्निको मुनिः ।
प्रियमेधो वाङ्गिरस ऋषिरित्यवगम्यताम् ॥ ३७ ॥

(Dyumnīka, son of Vasishṭha;
Priyamedha of Aṅgirasa lineage)

(88) तम्बोदस्मस्य सूक्तस्य नोधा नाम स गौतमः ।
(89) बृहदिन्द्राय सूक्तस्य ऋषी तस्योत्तरस्य च ॥ ३८ ॥

(Nodhā of the Gautama family)

नृमेधः पुरुमेधश्च सहैतावङ्गिरः सुतौः ।
(91) अपाला नाम कन्येति सूक्तस्यात्रेः सुता मुनिः ॥ ३९ ॥

(Nṛmedha and Purumedha, sons of Aṅgiras;
Apālā, daughter of Atri; she was unmarried)

श्रुतकक्षः सुकक्षश्च तावप्यङ्गिरसः सुतौ ।
(92) पान्तमा व इति त्वस्य तावृषी अवगम्यताम् ॥ ४० ॥

(Śruta-kaksha and Sukaksha, both sons of Aṅgiras)

(93) उद्धेदभीति सूक्तस्य सुकक्षः स्वयमेव तु ।

(94) गौर्धयतीति सूक्तस्य बिन्दुराङ्गिरसः सुतः ।

(Sukaksha; Bindu, son of Aṅgiras)

पूतदक्षोऽथवा ज्ञेयः सोऽपि चाङ्गिरसः सुतः ॥ ४१ ॥

(Pūtadaksha, son of Aṅgiras)

(95) आ त्वेति सूक्ते तत उत्तरे च
तिरश्चिनामाङ्गिरसस्तनूजः ।
तत्रोत्तरे मारुतिर्वा द्युतानो
रेभस्ततः काश्यप उत्तरस्य ॥ ४२ ॥

(Tirañchi of Aṅgiras family; Māruti, Dyutāna, Rebha, Kāśyapa)

(98) इन्द्राय सामसूक्तस्य तथा तस्योत्तरस्य च ।
नृमेधनामाङ्गिरस ऋषिरित्यवगम्यताम् ॥ ४३ ॥

(Nṛmedha of Aṅgiras lineage)

(100) अयन्त एमि सूक्तस्य नेमो नाम भृगोः सुतः ।
(100,4) अयमस्मि द्वृचे त्वस्मिन्निन्द्र एव ऋषिः स्मृतः ॥ ४४ ॥

(Nema, son of Bhṛgu)

(101) ऋधगित्थेति सूक्तस्य जमदग्निः स भार्गवः ।

(102) त्वमग्न इति सूक्तस्य प्रयोगो नाम भार्गवः ॥ ४५ ॥

(Jamadagni who was also the son of Bhṛgu)

अथवा बृहस्पत्यःपावकोऽग्निर्मुनिः स्मृतः ।

गृहपतियविष्ठाख्यावग्नी वा सहसः सुतौ ॥ ४६ ॥

(Agni-pāvaka, son of Bṛhaspati)

तयोरन्यतरो वाग्न्योऋषिरित्यवगम्यताम् ।

(103) ऋषिस्त्वदर्शि सूक्तस्य सोभरिर्नाम कण्वजः ॥ ४७ ॥

(Agnya; Sobhari, the son of Kaṇva)

इत्यष्टमं मण्डलम् ।



अथ नवमं मण्डलम् ।

(1) स्वादिष्ठयेत्युपक्रम्य नवमं मण्डलं प्रति ।
पावमान्यस्तु विज्ञेया ऋषयः सौमिकाश्च ते ॥ १ ॥

(Saumikas were seers of the ninth maṇḍala entirely asigned to Soma-Pavamāna; they were so called because of their devotion to Soma; somo devatā yeshām)

मण्डलाद्यस्य सूक्तस्य मधुच्छन्दा ऋषिः स्मृतः ।
(2) पवस्व देववीः सूक्ते मेधातिथिरिति स्मृतः ॥ २ ॥

(Madhuchchandas; Medhātithi)

(3) एष देव इति त्वस्य शुनःशेपो मुनिः स्मृतः ।
(4) सना च सोम सूक्तस्य हिरण्यस्तूप ऋषिः स्मृतः ॥ ३ ॥

(Śunah-śepa; Hiraṇya-stūpa)

एतेषामुक्तगोत्रत्वाद्गोत्रोक्तिर्न कृता मया ।
(5) समिद्ध इत्युपक्रम्य सूक्तानां विंशतिं प्रति ॥ ४ ॥

असितो वा देवलो वा ह्यृषिरेतौ तु काश्यपौ ।
(25) ऋषिः पवस्व सूक्तेऽस्मिन्नागस्त्यः स दृल्हच्युतः ॥ ५ ॥

(Asita and Devala, both sons of Kaśyapa)

दृल्हच्युतस्य पुत्रोऽयमिध्मवाहस्तदुत्तरे ।

(27) एष कविरेष वाजी सूक्तयोरनयोः क्रमात् ॥ ६ ॥ (28)

(Idhma-vāha, son of Dṛlhachyuta)

नृमेधः प्रियमेधश्च मुनिराङ्गिरसाविमौ ।

(29) प्रास्य प्र धारा अस्येति सूक्तयोरनयोः क्रमात् ॥ ७ ॥ (30)

(Nṛmedha and Priyamedha, sons of Aṅgiras)

नृमेधश्चाथ बिन्दुश्च मुनिरङ्गिरसः सुतः ।

(31) प्र सोमासः प्र सोमासः सूक्तयोरनयोः क्रमात् ॥ ८ ॥ (32)

(Nṛmedha and Bindu, sons of Aṅgiras)

राहूगणो गोतमोऽयं श्यावाश्वश्चात्रिगोत्रजः ।

(33) प्र सोमास उपक्रम्य द्वयोराप्त्यस्त्रितो मुनिः ॥ ९ ॥

(Rāhūgaṇa-Gotama; Śyāvāśva of the Atri family; Āptya-trita)

द्वयोर्द्वयोरुत्तरयोर्ऋषयोऽङ्गिरसः सुताः ।

प्रभूवसूरहुगणो बृहन्मतिरिमे त्रयः ॥ १० ॥

(Prabhūvasu and Rahūgaṇa, sons of Aṅgiras)

(41) प्र ये गाव उपक्रम्य त्रिषु सूक्तेष्वतः परम्।
मेध्यातिथिः स्वयं काण्व ऋषिरित्यवगम्यताम् ॥ ११ ॥

(Medhyātithi of the Kaṇva family)

त्रिष्वेवाङ्गिरसोऽयास्यः प्र ण इत्युत्तरेष्वृषिः। (44)
कविस्तु भार्गवः सूक्तेष्वया सोम इति त्रिषु ॥ १२ ॥ (47)

(Ayāsya of the Aṅgiras family; Kavi of Bhṛgu family and Soma of the Ayas family)

(50) उचथ्यस्त्रिषु सूक्तेपूत्त इत्यङ्गिरसः सुतः।
(53) उत्ते सूक्त उपक्रम्य सूक्तानामष्टकं प्रति ॥ १३ ॥

(Uchathya, son of Aṅgiras)

काश्यपोऽयमवत्सार ऋषिरित्यवगम्यताम्।
(61) अया वीतीति सूक्ते चामहीयुरङ्गिरःसुतः ॥ १४ ॥

(Avatsāra, son of Kaśyapa; Amahīyu, son of Aṅgiras)

(62) एते असृग्रमित्यस्मिन् जमदग्निर्भृगोः सुतः।
(63) आ पवस्वेति सूक्तेऽस्मिन्निध्रुविः काश्यपो मुनिः।
(64) वृषा सोमेति सूक्तेऽस्मिन् मारीचः कश्यपो मुनिः ॥ १५ ॥

(Jamadagni, son of Bhṛgu; Kaśyapa, son of Marīcha)

(65) हिन्वन्तिसूक्तं जमदग्निरार्षः

स्वयं भृगुर्वा वरुणस्य पुत्रः ।

असिद्धगोत्रास्तु पवस्व सूक्तं (66)

वैखानसा नाम शतं विदुस्ते ॥ १६ ॥

(Jamadagnī; Bhṛgu, son of Varuṇa; Vaikhānasa sages)

(67) त्वं सोमसूक्ते सतृचास्तृचेषु

मुख्येषु सप्तस्वृषयः प्रसिद्धाः ।

भरद्वाजः कश्यपो गोतमोऽत्रि-

र्विश्वामित्रो जमदग्निर्वसिष्ठः ॥ १७ ॥

(The seven seers mentioned here :
Bharadvāja, Kaśyapa, Gotama, Atri,
Viśvāmitra, Jamadagni and Vasishṭha)

उत्तराणां तु शिष्टानामृचामङ्गिरसः सुतः ।

पवित्रो वा वसिष्ठो वा ह्युभौ वा तावृषी सह ॥ १८ ॥

(Pavitra, son of Aṅgiras; Vasishṭha)

(68) प्र देवमिति वत्सप्रिः सूक्तं भालन्दनो जगौ ।

(69) इषुः सूक्तं त्वाङ्गिरसो हिरण्यस्तूप उत्तरम् ॥ १९ ॥

(Bhālandana; Hiraṇyastūpa)

(70) त्रिरस्मा इति सूक्तेऽस्मिंस्तत आ दक्षिणोत्तरे । (71)

रेणुः पूर्वोऽथ ऋषभो वैश्वामित्रौ च तावृषी ॥ २० ॥

(Reṇu and Ṛshabha, sons of Viśvāmitra)

(72) हरिं मृजन्ति सूक्तस्य स्रके द्रप्सस्य च क्रमात् । (73)

हरिमन्तः पवित्रश्च मुनिरङ्गिरसः सुतः ॥ २१ ॥

(Pavitra, son of Aṅgiras)

(74) शिशुर्न सूक्ते कक्षीवान्मुनिर्दीर्घतमः सुतः ।

(75) अभि प्रियाण्युपक्रम्य पञ्चसूक्तेष्वतः परम् ॥ २२ ॥

(Kakshīvān, son of Dīrghatamas)

कविर्नाम भृगोः पुत्र ऋषिरित्यवगम्यताम् ।

(80) सोमस्य धारेत्यादीनां सूक्तानां त्रितयं प्रति ॥ २३ ॥

(Kavi, son of Bhṛgu)



भारद्वाजो वसुर्नाम मुनिरित्यवगम्यताम् ।

(89) पवित्रमिति सूक्तस्य पवित्रोऽङ्गिरसः सुतः ॥ २४ ॥

(Vasu, son of Bharadvāja; Pavitra, son of Aṅgiras)

(84) ऋषिः पवस्व सूक्तस्य वाच्यो नाम प्रजापतिः ।

(85) इन्द्राय सोम सूक्तस्य वेनो नाम स भार्गवः ॥ २५ ॥

(Vāchya-Prajāpati; Vena of Bhṛgu lineage)

(86) प्र ते हि सूक्तं प्रथमं दशर्च-

मकृष्टमाषा ऋषयो विदुस्ते ।

निवावरीस्ते सिकता द्वितीयं

तृतीयमेते खलु पृश्नयोऽजाः ॥ २६ ॥

गणास्त्रयोऽमी कथिताश्चतुर्थ-

मेषां तु गोत्रं क्वचिदप्रसिद्धम् ।

शिष्टास्तु पञ्चस्त्वृषिरत्रिरेता-

स्वन्त्ये तृचे गृत्समदः प्रसिद्धः ॥ २७ ॥

(Groups of sages : Nivāvarī, Sikatā and Pṛśṇis;
Atri and Gṛtsamada)

(87) प्र तु द्रवेत्युपक्रम्य सूक्तानां त्रितयं प्रति ।
काव्योऽयमुशना नाम ऋषिरित्यवगम्यताम् ॥ २८ ॥

(Kāvya-Uśanā)

(90) प्र हिन्वानो वसिष्ठस्तु मित्रावरुणयोः सुतः ।
(91) असर्जि वक्ता सूक्तस्य तथा तस्योत्तरस्य च ॥ २९ ॥

(Vasishṭha, son of Mitrāvaruṇa)

मारीचः कश्यपो नोधाः साकमुक्षस्य गौतमः ।
(94) अधि यच्च कनिक्रन्ति सूक्तयोरनयोः पुनः ॥ ३० ॥ (95)

(Kaśyapa, son of Marīcha; Nodhā, Gautama)

घौरः कण्व ऋषिः पूर्व्वे काण्वः प्रस्कण्व उत्तरे ।
(96) प्र सेनानीति सूक्तस्य दैवोदासिः प्रतर्दनः ॥ ३१ ॥

(Kaṇva of the Ghora family;
Praskaṇva, son of Kaṇva)

अस्य प्रेषेति सूक्तस्य वसिष्ठः प्रथमे तृचे ।
उत्तरेषु नवस्वेते तस्य पुत्राः पृथक् पृथक् ॥ ३२ ॥

(Vasishṭha and his sons)

इन्द्रप्रमतिरेकस्तु तेषां वृषगणः परः ।
मन्युश्च उपमन्युश्च व्याघ्रपाच्छक्तिरुत्तरः ॥ ३३ ॥

(Indra-Pramati, Manyu, Upamanyu,
Vyāghrapāt and Śakti)

कर्णश्रुश्च मृळीकश्च वसुक्रो नवमः स्मृतः ।
चतुर्दशानां शिष्टानामृचां शाक्त्यः पराशरः ॥ ३४ ॥

(Karṇaśrut, Mṛḷīka, Vasukra; Parāśara, son of Śakti)

(97,45) सोमः सुतस्तथान्त्यानां कुत्स आङ्गिरसो मुनिः ।
(98) अम्बरीषोऽभि नः सूक्ते मान्धातृतनयस्तथा ॥ ३५ ॥

(Kutsa of Aṅgiras family;
Aṁbarīsha, son of Māndhātṛ)

भारद्वाज ऋजिश्वा च तावेतौ सहिताबृषी ।
रेभसूनू काश्यपौ च द्वयोरुत्तरयोर्ऋषी ॥ ३६ ॥

(Bhāradvāja and Ṛjiśvā; Rebhasūnu and Kāśyapa)

(101) पुरोजितीति सूक्तस्य सतृचा ऋषयः स्मृताः ।
श्यावाश्वः प्रथमोऽन्धीगुर्ययातिर्नाहुषः परः ॥ ३७ ॥

(Śyāvāśva; Yayāti, son of Nahusha)

नहुषो मानवस्त्वेको मनु सांवरणः परः ।
चत्वार एते सतृचाः शेषे वाच्यः प्रजापतिः ॥ ३८ ॥

(Nahusha, son of Manu; Sāmvaraṇa; Prajāpati)

(102) क्राणेत्यास्यस्त्रितः सूक्ते द्वित आप्त्यस्तदुत्तरे ।
पर्व्वतो नारदः काण्वौ सखायः सूक्तयोः सह ॥ ३९ ॥ (104)

(Dvita-Āptya; Parvata and Nārada, both from the lineage of Kaṇva)

पूर्व्वे तु द्वे शिखण्डिन्यौ काश्यप्यौ वाप्सरः स्त्रियौ ।
(106) इन्द्रमच्छेति सूक्तस्य सतृचा ऋषयस्त्रयः ॥ ४० ॥

(The two Śikhaṇḍinīs and Apsaras, all ladies)

चाक्षुषोऽग्निश्च चक्षुश्च मानवो मनुराप्सवः ।
सूक्तस्य शिष्टे पञ्चर्च्चे चाक्षुषोऽग्निर्ऋषिः स्मृतः ॥ ४१ ॥

(Chākshusha-Agni, son of Chakshu, descendent of Manu)



(107) परीत इति सूक्तेऽस्मिन् भारद्वाजादयो विदुः ।
एते तु सप्त ऋषयः सगोत्राः परिकीर्तिताः ॥ ४२ ॥

(भरद्वाजादयः : Bharadvāja, Kaśyapa, Gotama, Atri, Viśvāmitra, Jamadagni, and Vasishṭha, according to *Anukramaṇikā-vivaraṇa* and *Vedārtha-dīpikā*; these seven seers came from the same lineage)

(108) पवस्वेत्युत्तरं सूक्तं सप्तैते त्वृषयो विदुः ।
तस्य त्वाद्ये द्वृचे शाक्त्यो गौरिवीतिर्ऋषिः स्मृतः ॥ ४३ ॥

(Gaurivīti, son of Śakti)

तृतीयाया ऋचः शक्तिर्वासिष्ठोऽन्त्ये तृचेऽपि च ।
अथ द्वृचानां शिष्टानामूरुराङ्गिरसो मुनिः ॥ ४४ ॥

(Śakti, son of Vasishṭha; Ūru, son of Aṅgiras)

भारद्वाज ऋजिश्वा च तथैवाङ्गिरसौ नृपाः ।
ऊर्ध्वसद्मा कृतयशा ऋणञ्चय इति त्रयः ॥ ४५ ॥

(Bhāradvāja and Ṛjiśvā, both sons of Aṅgiras; Ūrdhva-sadmā; Ṛṇañchaya)

(109) धिष्ण्याग्नयः परि प्रेति सूक्तमैश्वरयो विदुः ।

(110) पर्य्यूषु प्रेति सूक्तस्य त्रिवृष्णपुरुकुत्सजौ ॥ ४६ ॥

(Trivṛshṇa and Purukutsaja)

त्र्यरुणस्त्रसदस्युश्च मुनिरित्यवगम्यताम् ।

(111) अया रुचेति सूक्तस्य पारुच्छेपिरनानतः ॥ ४७ ॥

(Trasadasyu and Pāruchchepi)

(112) नानानमिति सूक्तस्य शिशुराङ्गिरसो मुनिः ।

(113) शर्य्यणावति सूक्तस्य य इन्दोरुत्तरस्य च ॥ ४८ ॥ (114)

(Śiśu of the Aṅgiras family)

मारीचः कश्यपो नाम ऋषिरित्यवगम्यताम् ।

(Kaśyapa, son of Marīcha)

इति नवमं मण्डलम् ।

अथ दशमं मण्डलम् ।

(1) अग्ने बृहन्नितित्वेतद्दशमं मण्डलं प्रति ।
क्षुद्रसूक्ता महासूक्ता विज्ञेया ऋषयस्त्विति ॥ १ ॥

मण्डलादिमुपक्रम्य सप्तसूक्तेष्वतः परं ।
आप्त्यस्त्रितो मुनिस्त्वाष्ट्रस्त्रिशिराः सूक्तयोर्द्वयोः ॥ २ ॥

(Āptya-Trita; Tvāshṭra-triśiras)

(8) प्रकेतुनेति तत्रापि यत्सूक्तश्चरमन्तयोः ।
अम्बरीषसुतस्तत्र सिन्धुद्वीपोऽथवा मुनिः ॥ ३ ॥

(Sindhudvīpa, son of Ambarīsha)

(10) ओ चि त्सूक्तेष्वृयुक्त्वृक्षु षष्ठ्या सह मुनिर्यमी ।
वैवस्वतो यमो नाम नवम्या सह युक्षु तु ॥ ४ ॥

(Yamī and Yama, children of Vivasvān)

(11,12) वृषाद्यावायुजेत्येषां सूक्तानां त्रितयं प्रति । (13)
आङ्गिर्नाम हविर्धानो मुनिरित्यवगम्यताम् ॥ ५ ॥

(Āṅgi is Āṅgirasa, cf. *Anukramaṇikā-vivaraṇa*)

एतेषामुत्तरे सूक्ते विवस्वान्नदितेः सुतः ।

(14) परेयिवांसं सूक्तस्य यमो वैवस्वतो मुनिः ॥ ६ ॥

(Vivasvān, son of Aditi;
Yama, son of Vivasvān)

उदीरतामुपक्रम्य पञ्चसूक्तान्यतः परम् ।

(15) यमपुत्रा विदुस्तेषामुच्छङ्खो दमनस्तु मा ॥ ७ ॥ (16)

(Children of Yama)

(17) एको देवश्रवास्त्वष्टापरः सङ्कुसुकः परम् । (18)

(19) मथितस्तु नि वर्तध्वमस्मिन् सूक्ते मुनिः पुनः ॥ ८ ॥

भृगुर्वा वारुणिर्विद्याद्भार्गवश्च्यवनोऽथवा ।

(20) भद्रमित्यादिसूक्तानां सप्तानां विमदो मुनिः ॥ ९ ॥

(Bhṛgu, son of Varuṇa; Chyavana of
Bhṛgu family; Vimada)

प्राजापत्यः स ऐन्द्रो वा वसुकृद्वा वसुक्रजः ।

ऋषिर्वसुक्र ऐन्द्रीयस्त्रिषु सूक्तेष्वसत्स्विति ॥ १० ॥

(Vasukṛt, son of Vasukra)

(28) तन्मध्यसूक्ते विश्वो हि प्रथमाया ऋचो मुनिः ।
इन्द्रस्नुषा वसुक्रस्य पत्न्येवेन्द्रो युजामृचाम् ॥ ११ ॥

(dauther-in-law of Indra and wife of Vasukra)

चतुर्थ्या सह शिष्टानां वसुक्रस्त्वयुजामृचाम् ।
(30) प्र देवत्रेति सूक्तानां पञ्चानां कवषो मुनिः ॥ १२ ॥

(Vasukra; Kavasha)

ऐलूषो मौजवान् वाक्षः प्रावेपा मेति चोत्तरे ।
लुशो मुनिः स धानाकस्त्वबुध्रमिति सूक्तयोः ॥ १३ ॥

(Ailūsha; Luśa)

(37) नमो मित्रस्य सूक्तस्य सूर्य्यजोऽभितपा मुनिः ।
अस्मिन्न इति सूक्तस्य ऋषिरैन्द्रस्तु मुष्कवान् ॥ १४ ॥

(Abhitapā, offspring of Sūrya; Indra)

यो वां परिज्या सूक्तस्य रथमित्युत्तरस्य च ।
कक्षीवतः सुता घोषा ह्यृषिकेत्यत्र कीर्तिता ॥ १५ ॥

(Ghoshā, daughter of Kakshīvān)

(41) समानमुत्यं घौषेयः सुहस्त्यो नाम वा ऋषिः ।
(42) अस्तेवेति त्रिसूक्तानां कृष्ण आङ्गिरसो मुनिः ॥ १६ ॥

(Suhastya; Kṛshṇa of Aṅgirasa lineage)

(45) दिवस्परि प्र होतेति सूक्तयोरनयोस्त्वृषिः । (46)
भालन्दनस्तु वत्सप्रिर्जगृभ्मेत्युत्तरस्य तु ॥ १७ ॥ (47)

(Bhālandana; Vatsa-priya in *Vivaraṇa*)

सप्तगुर्नाम विज्ञेयो मुनिरङ्गिरसः सुतः ।
(48) अहम्भुव मुपक्रम्य सूक्तानां त्रितयं प्रति ॥ १८ ॥

(Vatsagu, son of Aṅgiras; called here Saptagu)



ऋषिरिन्द्रस्तु वैकुण्ठो महत्तदिति तु त्रिषु । (51)
देवानामग्निना साकं संवादः क्रियतेऽत्र तु ॥ १९ ॥

(Indra, son of Vikuṇṭha)

(53) यमैच्छामेति सूक्तेऽस्मिन् देवा ऋषय उत्तरे ।
(52) विश्वे देवा इति त्वस्मिन् सौचीकोऽग्निस्त्वृषिः स्मृतः ॥ २० ॥

(Sauchīka-Agni)

(51) महत्तदिति पूर्व्वे तु देवा एवायुजामृचाम् ।
युजां त्वग्निः स सौचीकस्तदद्येति द्वृचस्य च ॥ २१ ॥ (4,3,4)

(Agni-Sauchīka)

(54) तां सु ते कीर्तिमित्यादिसूक्तानां त्रितयं प्रति ।
बृहदुक्थो वामदेव्य ऋषिरित्यवगम्यताम् ॥ २२ ॥

(Bṛhaduktha, son of Vāmadeva)

(57) मा प्र गामेत्युपक्रम्य चतुः सूक्तेष्वतः परम् ।
बन्ध्वाद्या ऋषयो ज्ञेया गोपायनसुतास्त्रयः ॥ २३ ॥

(The brothers Bandhu, Subandhu and Srutabandhu children of Gopāyana)

स्वसागस्त्यस्य मातैषामगास्त्यस्येत्यृचो मुनिः । (60,6)

(61) इदमित्थेति सूक्तस्य ये यज्ञेनोत्तरस्य च ॥ २४ ॥ (62)

(Asamāti, mother of Bandhu etc.,
She was sister of Agastya)

नाभानेदिष्ठनामायमृषिर्ज्ञेयः स मानवः ॥ २५ ॥

(Nābhānedishṭha of the lineage of Manu;
Gaya; Plāta)

गयः प्लातो मुनिर्विद्यात्परावत इति द्वयोः । (63)

वासुक्रो वसुकर्णोऽयमग्निरिन्द्र इति द्वयोः ॥ २६ ॥ (65)

(Vasukarṇī, the son of Vasukra)

अयास्यनामाङ्गिरस इमान्धियमिति द्वयोः । (67)

वाध्र्यश्वस्तु सुमित्रोऽयं भद्रा अग्नेरिति द्वयोः ॥ २७ ॥ (69)

(Ayāsya of the Aṅgiras family; Vādhryaśva)

बृहस्पतिस्त्वाङ्गिरसो बृहस्पत इति द्वयोः । (71)

अनयोरुत्तरे सूक्ते लोक्यो वा स बृहस्पतिः ॥ २८ ॥

(Bṛhaspati of the Aṅgiras family; Lokya)

अदितिर्वा दक्षपुत्री मुनिरित्यवगम्यताम् ।

ऋषिः शाक्त्यो गौरिवीतिर्जनिष्ठा इति सूक्तयोः ॥ २९ ॥ (73)

(Aditi, daughter of Daksha; Gaurivīti, son of Śakti)

सिन्धुक्षित्प्रैयमेधोऽयं प्र सु वः सूक्त उत्तरे । (75)

ऐरावतो जरत्कर्ण आ व ऋञ्जसः उत्तरे ॥ ३० ॥ (76)

(Jarat-karṇa, son of Irāvat)

भृगुपुत्रः स्यूमरश्मिरभ्रप्रुष इति द्वयोः । (77)

अग्निर्वैश्वानरो वायं स सौचीकोऽग्निरेव वा ॥ ३१ ॥

(Syūmaraśmi, son of Bhṛgu; Agni-Vaiśvānara; Sauchīka-Agni)

सप्तिर्वाजम्भरो वायमपश्यमिति सूक्तयोः । (79)

भौवनो विश्वकर्म्मायं य इमेत्यादिसूक्तयोः ॥ ३२ ॥ (81)

(Viśvakarmā, son of Bhuvana)

ऋषिस्तु तापसो मन्युर्यस्ते मन्यविति द्वयोः । (83)

(85) सत्येनोत्तभितासूक्तं सूर्य्या सावित्रीत्यार्षं तत् ॥ ३३ ॥

(Manyu; Sūryā)

(86) वि हीति सूक्तमिन्द्राण्या इन्द्रस्य च वृषाकपेः ।

(86,1) वि हि सोतोः किं सुबाह विन्द्राणीं नाह मित्यृचां ॥ ३४ ॥ (86,8)

(86,11) (86,12)

(Indrāṇī)

(86,19) अयमेमीति चारभ्य तथा चतसृणामृचाम् ।

(86,14) उक्ष्णो ही त्यनया साकं नवानामिन्द्र एव दृक् ॥ ३५ ॥

(Indra)

(86,7) उवे अम्ब सुलाभिके वृषाकपायि रेवति । (86,13)

(86,23) पर्शुर्हेति तिसृणां च ऋषिरिन्द्रो वृषाकपिः ॥ ३६ ॥

(Vṛshākapi, son of Indra)

एकादशानां शिष्टानामिन्द्राणी सा पुलोमजा ।

पायूरक्षोहणे सूक्ते भरद्वाजसुतो मुनिः ॥ ३७ ॥ (87)

(Indra's wife, who was the daughter of Puloma, was the seer; Bhāradvāja)

हविष्यान्तस्य सूक्तस्य मूर्द्धन्वान्नाम दर्शितः (दर्शकः) । (88)

अयन्त्वङ्गिरसः पुत्रो वामदेव्योऽथवा पुनः ॥ ३८ ॥

(Mūrdhanvān; son of Aṅgiras)

विश्वामित्रसुतो रेणुः सूक्तस्येन्द्रं स्तवेत्यृषिः । (89)

(90) सहस्रशीर्षा सूक्तस्य ऋषिर्नारायणः स्मृतः ॥ ३९ ॥

(Reṇu, son of Viśvāmitra; Nārāyaṇa)

(91) सञ्जागृवद्भिरित्यस्मिन् वैतहव्योऽरुणो मुनिः ।

(92) यज्ञस्येत्यस्य सूक्त्य शार्य्यातो नाम मानवः ॥ ४० ॥

(Aruṇa, son of Vītahavya; Śaryāta,
the descendent of Manu)

(93) महि द्यावेति सूक्तस्य पार्थ्यस्तान्व ऋषिः स्मृतः ।

(94) प्रैते सूक्तस्य सर्पोऽयं काद्रवेयोऽर्बुदो मुनिः ॥ ४१ ॥

(Pārthya, son of Pārtha; Sarpa or Arbuda,
descendent of Kadrū)

(95) उर्व्वशी च हये सूक्ते मुनिरैलः पुरूरवाः ।

ऐलस्य वाक्यमत्रैताः प्रथमाथ चतुर्द्दशी ॥ ४२ ॥

(Aila-Purūravas)

तृतीया द्वादशी षष्ठी सप्तदश्या सहेति षट् ।

(95,8) सचा यदिति तिस्रश्च उर्व्वश्या उत्तरा नव ॥ ४३ ॥

(Urvaśī)

(96) प्र ते मह इति त्वस्य बरुरङ्गिरसः सुतः ।

ऐन्द्रः सर्व्वहरिर्वायमृषिरित्यवगम्यताम् ॥ ४४ ॥

(Baru, the son of Aṅgiras; Sarvahari, son of Indra)

(97) या ओषधीस्तु सूक्तस्य ऋषिराथर्व्वणी भिषक् ।

आर्ष्टिषेणस्तु देवापिर्मुनिः सूक्ते बृहस्पते ॥ ४५ ॥ (98)

(Atharvaṇa, the physician;

Devāpi, son of Arshṭisheṇa)

(99) कं नः सूक्तस्य वम्रस्तु वैखानस ऋषिः स्मृतः ।

(100) इन्द्र दृह्येति सूक्तस्य दुवस्युर्नाम वान्दनः ॥ ४६ ॥

(Vaikhānasa; Duvasyu)

(101) उद्बुध्यध्वं बुधः सौम्यो भार्म्यश्वो मुद्गलः प्र ते ।

(103) आशुः शिशानः सूक्तेऽस्मिन्नैन्द्रोऽप्रतिरथो मुनिः ॥ ४७ ॥

(Apratiratha, son of Indra)

(104) असावि सोम इत्यस्य वैश्वामित्रोऽष्टकस्त्वृषिः ।

(105) कदा सूक्ते सुमित्रो वा दुर्मित्रो वा स कुत्सजः ॥ ४८ ॥

(Ashṭaka, son of Viśvāmitra; Sumitra or

Durmitra was the son of Kutsa)

उभा उसूक्ते भूतांशः कश्यपस्य सुतो मुनिः ।
(106) आविः सूक्तस्य चैतस्य दिव्यो वाङ्गिरसः स्वयम् ॥ ४९ ॥

(Bhūtāṁśa, son of Kaśyapa;
Divya or Aṅgirasa himself)

प्राजापत्या दक्षिणा वा त्वृषिरित्यवगम्यताम् ।
(108) किमिच्छन्तीति सूक्तस्य युजामासामृचामृषिः ॥ ५० ॥

(Dakshiṇā, daughter of Prajāpati)

अन्त्यायाश्च शुनी नाम सरमा पणयोऽयुजाम् ।
(109) तेऽवदन्निति सूक्तस्य ब्रह्मजाया जुहुर्मुनिः ॥ ५१ ॥

(Śunī-Saramā; Juhū, the spouse of Brahmā)

अथवोर्ध्वनाभा नाम ब्रह्मपुत्र ऋषिः स्मृतः ।
(110) समिद्धो अद्य सूक्तस्य जमदग्निर्भृगोः सुतः ॥ ५२ ॥

(Ūrdhvanābhā, son of Brahma;
Jamadagni, son of Bhṛgu)

रामस्तु जामदग्न्यो वा मुनिरित्यवगम्यताम् ।
परे चत्वारि सूक्तानि वैरूपा ऋषयो विदुः ॥ ५३ ॥

(Rāma, son of Jamadagni; Vairūpa-seers)

अष्टादंष्ट्रो मुनिस्तत्र सूक्तस्यास्य मनीषिणः । (111)

नभः प्रभेदनः सूक्ते परे त्विन्द्र पिबेत्पृषिः ॥ ५४ ॥ (112)

(Ashṭādamshṭra)

शतप्रभेदनः सूक्ते तमस्येति तदुत्तरे । (113)

(114) घर्मेति सूक्ते सघ्रिस्तु घर्मो वा तत्र तापसः ॥ ५५ ॥

(Gharma)

(115) चित्र इच्छिशोः सूक्तस्य वार्ष्टिहव्य उपस्तुतः ।

(116) पिवा सोममिति त्वस्मिन् स्थौरो वाग्नियुतो मुनिः ॥ ५६ ॥

(Vārshṭihavya; Sthaura)

अग्नियूपोऽथवा स्थौरो मुनिरित्यवगम्यताम् ।

(117) न वा उ देवाः सूक्तस्य भिक्षुरङ्गिरसः सुतः ॥ ५७ ॥

(Sthaura; Bhikshu, son of Aṅgiras)

अमहीयुसुतः सूक्तस्याग्रे हंसीत्युरुक्षयः ।

(119) इति वा इति सूक्तस्य मुनिरिन्द्रसुतो लवः ॥ ५८ ॥

(Lava, son of Indra;

Urukshya, son of Amahīyu)

अथर्वणः सुतः सूक्ते तदिदास बृहद्दिवः । (120)

(121) हिरण्यगर्भः सं सूक्ते प्रजापतिसुतो मुनिः ॥ ५९ ॥

(Bṛhaddiva, son of Atharvaṇ;

Hiraṇyagarbha, son of Prajāpati)

(122) वसुं न सूक्ते वासिष्ठो नाम्ना चित्रमहा ऋषिः ।

(123) अयं वेनश्च सूक्तस्य वेनो नाम भृगोः सुतः ॥ ६० ॥

(Chitramahā, son of Vasishṭha;

Vena son of Bhṛgu)

(124) इमं न इति सूक्तेऽस्मिन्निन्द्रः स्वयमृषिः स्मृतः ।

(124,2) अदेवाद्देव इत्यादि तिसृणामग्निरत्र तु ॥ ६१ ॥

(Indra; Agni)

(125) अहं रुद्रेभिरित्यस्मिन्नाम्भृणी नाम वागृषिः ।

(126) न तमंहो न शैलूषिः सूक्ते कुल्मलबर्हिषः ॥ ६२ ॥

(Vāk, daughter of Ambhraṇī; Kulmala-barhi)

अंहोमुग्वामदेव्यो वा ऋषिरित्यवगम्यताम् ।

(127) रात्री व्यख्यदिति त्वस्मिन् सौभरः कुशिको मुनिः ॥ ६३ ॥

(Kuśika, son of Sobhari)

भरद्वाजसुता रात्रिरथवा गम्यतामृषिः ।

(128) ममाग्ने इति सूक्तस्य विहव्योऽङ्गिरसः सुतः ॥ ६४ ॥

(Rātri, daughter of Bharadvāja;

Vihavya, son of Aṅgiras)

(129) नासत्सूक्ते मुनिर्ज्ञेयः परमेष्ठी प्रजापतिः ।

(130) यो यज्ञः सूक्ते यज्ञस्तु प्राजापत्य ऋषिः स्मृतः ॥ ६५ ॥

(Yajña, son of Prajāpati, also called Parameshṭhi)

काक्षीवतः सुकीर्तिस्तु सूक्तेऽप प्राच उत्तरे । (131)

(132) ईजानं सूक्ते नार्मेधः शकपूत ऋषिः स्मृतः ॥ ६६ ॥

(Sukīrti, son of Kakshīvat;

Śakapūta, son of Nṛmedha)

(133) प्रो ष्वस्मा इति सूक्तस्य सुदाः पैजवनो मुनिः ।

यौवनाश्वस्तु मान्धाता सूक्तस्योभे यदित्यृषिः ॥ ६७ ॥ (134)

(Sudhāh-Paijavana; Māndhātā, son of Yavanāśva)

(134,7) इहोत्तमामथाध्यर्द्धां गोधा नारी ददर्श ह ।

(135) यस्मिन् सूक्ते कुमारोऽयमृषिर्यामायनः स्वयम् ॥ ६८ ॥

(Godhā, lady; Kumāra, descendent of Yama)

मुनयो वातरशना एकर्चाः सप्त केशिनः । (136)
जूतिश्च वातजूतिश्च विप्रजूतिर्वृषाणकः ॥ ६९ ॥

(The Vātaraśana-sages, Jūti, Vātajūti, Viprajūti)

करिक्रतैतशौ च द्वावृष्यशृङ्गश्च सप्तमः ।
(137) उत सूक्तं सप्तर्षय एकर्चा एव ते विदुः ॥ ७० ॥

(The Saptarshis are the seven sages,
Bharadvāja and others)

(138) तव त्य इति सूक्तस्य अङ्गस्त्वृषिरुरोः सुतः ।
विश्वावसुः सूर्य सूक्ते मुनिर्गन्धर्व एव सः ॥ ७१ ॥ (139)

(Aṅga, son of Uru; Viśvāvasu-gandharva)

(140) अग्ने तवेति सूक्तस्य मुनिरग्निस्तु पावकः ।
(141) अग्ने अच्छेति सूक्तस्य मुनिरग्निस्तु तापसः ॥ ७२ ॥

(Agni, the Pāvaka and Agni the Tāpasa)

(142) अयं सूक्ते द्वृचाः शार्ङ्गा जरिता द्रोण उत्तरः ।
सारिसृक्तः स्तम्बमित्रस्त एते पक्षिणो विदुः ॥ ७३ ॥

(The Birds as seers)

(143) त्यं चि त्सूक्तस्य साङ्ख्योऽत्रिरयमित्युत्तरस्य तु । (144)
तार्क्ष्यपुत्रः सुपर्णो वा मुनिर्यामायनोऽथवा ॥ ७४ ॥

(Sāṅkhya of the Atri family; Suparṇa, son of Tārkshya)

स ऊर्ध्वकृशनो ज्ञेय इन्द्राणीमां खनाम्यृषिः । (145)
ऐरम्मदो देवमुनिररण्यानी त्यृषिः स्मृतः ॥ ७५ ॥ (146)

(Indrāṇī; Araṇyānī)

सुवेदा नाम शैरीषः श्रत्ते सूक्ते मुनिः स्मृतः । (147)
(148) सुष्वाणासस्तु सूक्तस्य वैन्यो नाम पृथुर्मुनिः ॥ ७६ ॥

(Suvedā, son of Śirīsha; Pṛthu, son of Vena)

(149) सविता सूक्तस्य चार्चन् हैरण्यस्तूप एव सः ।
मृलीको नाम वासिष्ठः समिद्धश्चिदिहेत्यृषिः ॥ ७७ ॥ (150)

(Archan, son of Hiraṇyastūpa;
Mṛlīka, descendent of Vasishṭha)

(151) श्रद्धयाग्निरिति त्वस्य श्रद्धा कामायनी मुनिः ।
भरद्वाजसुतः शासः शास इत्थेत्यृषिः स्मृतः ॥ ७८ ॥ (152)

(Śraddhā, daughter of Kāmāyaṇa;
Śāsa, son of Bharadvāja)

इन्द्रस्य मातरो यास्ता ऋषयो देवजामयः ।

(153) ईङ्खयन्तीरिति त्वस्य सोमो वैवस्वती यमी ॥ ७९ ॥ (154)

(Yamī, daughter of Vivasvān)

(155) अरायि सूक्तेऽयमृषिर्भारद्वाजः शिरिम्बिठः ।

अग्निं हिन्वन्तु नः सूक्ते केतुरग्निसुतो मुनिः ॥ ८० ॥ (156)

(Śirimbiṭha, descendent of Bharadvāja;

Ketu, son of Agni)

(157) इमा नु भुवन आप्त्यः साधनो भौवनोऽथवा ।

(158) सूर्यो न इति सूक्तस्य सौर्यश्चक्षुस्त्वृषिः स्मृतः ॥ ८१ ॥

(Bhuvana-Āptya or his son Sādhana;

Sūrya, Chakshu's son)

(159) उदसौत्वस्य पौलोमी शची नाम मुनिः स्मृतः ।

(160) ऋषिस्तीव्रस्य सूक्तस्य वैश्वामित्रस्तु पूरणः ॥ ८२ ॥

(Śachī, daughter of Puloma; Pūraṇa, son of Viśvāmitra)

(161) प्राजापत्यस्तु मुञ्चामीत्यपश्यद्यक्ष्मनाशनः ।

रक्षोहायमृषिर्ब्राह्मो ब्रह्मणाग्निरमुष्य तु ॥ ८३ ॥ (162)

(Yakshma-nāśana)

(163) अक्षीभ्यामिति सूक्तस्य काश्यपो विवृहा मुनिः ।

प्रचेतास्तु जगौ सूक्तमपेहीत्यङ्गिरः सुतः ॥ ८४ ॥ (164)

(Vivṛhā of the Kaśyapa family;
Prachetas, son of Aṅgiras)

(165) देवाः कपोतः सूक्तस्य कपोतो नैर्ऋतस्त्वृषिः ।

(166) ऋषभं मेति सूक्तस्य वैराज ऋषभो मुनिः ॥ ८५ ॥

(Kapota; Ṛshabha, son of Virāj)

शाकरो वा स ऋषभस्तुभ्येदमिति तूत्तरे । (167)

विश्वामित्रजमदग्नी ऋषिर्गाथिनभार्गवौ ॥ ८६ ॥

(Viśvāmitra of the Gāthin lineage; and
Jamadagni of Bhṛgu lineage)

वातायनो मुनिः सूक्तं वातस्येत्यनिलो जगौ । (168)

(169) मयोभूः शवरः सूक्तं काक्षीवत ऋषिर्जगौ ॥ ८७ ॥

(Vātāyana; Kākshīvat)

(170) विभ्राट् सूक्तमिदं सौर्यो नाम्ना विभ्राडृषिर्जगौ ।

इटतो भार्गवः सूक्तं त्वन्त्यमिटतो जगौ ॥ ८८ ॥ (171)

(Bhārgava)

त्रीण्युत्तराणि सूक्तानि विदुरङ्गिरसस्त्रयः ।

(172) आयाह्यात्वाभि संवर्तो ध्रुवोऽभीवर्त्त इत्यमी ॥ ८९ ॥ (173) (174)

(Three children of Aṅgiras)

(175) प्र वो ग्रावाण इत्यस्मिन्नूर्ध्वग्रावार्बुदिर्मुनिः ।

(176) प्र सूनव इति त्वस्य सूनुर्नामार्भवो मुनिः ॥ ९० ॥

(Ūrdhvagrāva; Arbhava, his son)

प्राजापत्यः पतङ्गोऽयं पतङ्गं सूक्तमुक्तवान् । (177)

अरिष्टनेमिस्ताक्ष्र्योऽयं जगौ सूक्तं त्यमूष्विति ॥ ९१ ॥ (178)

(Pataṅga, son of Prajāpati;

Arishṭanemi, son of Tārksha)

(179) उत्तिष्ठतेति चैकर्चाः सूक्तमेतत्रयो विदुः ।

शिबिरौशीनरः पूर्वः काशिराजः प्रतर्दनः ॥ ९२ ॥

(Śibi, Auśīnara, and Pratardana)

रौहिदश्वो वसुमना इत्येत ऋषयः क्रमात् ।

(180) प्र ससाहिष इत्यस्मिन्निन्द्रपुत्र ऋषिर्जयः ॥ ९३ ॥

(Rauhidaśva, Vasumanā and Jaya, son of Indra)

प्रथो नाम स वासिष्ठो भारद्वाजश्च सप्रथः ।
(181) घर्मः सौर्यस्त एकर्चाः प्रथः सूक्त इमे विदुः ॥ ९४ ॥

(Pratha, son of Vasishṭha; Sapratha, son of Bharadvāja; Gahrma, son of Sūrya)

बार्हस्पत्यस्तपुर्मूर्धा मुनिः सूक्ते बृहस्पतिः । (182)
प्राजापत्यस्य सूक्तन्तदपश्यन्त्वा प्रजावतः ॥ ९५ ॥ (183)

(Bṛhaspati)

(184) विष्णुर्योनिमिति त्वस्मिंस्त्वष्टा वा गर्भकृन्मुनिः ।
प्राजापत्योऽथवा विष्णुर्नेजमेषस्तदुत्तरे ॥ ९६ ॥

(Garbhakṛt)

(185) ऋषिः सत्यधृतिर्नाम महि सूक्ते स वारुणिः ।
(186) वात आ वातु सूक्तस्य प्र नूनमिति तस्य च ॥ ९७ ॥ (188)

(Satyadhṛti, son of Varuṇa)

वत्सः श्येनश्च तावेतावग्निपुत्रावृषी पृथक् ।
(189) आयङ्गौरिति सूक्तस्य सार्पराज्ञी मुनिः स्मृतः ॥ ९८ ॥

(Vatsa and Śyena, sons of Agni; Sārparājñī)

मधुच्छन्दः सुतः सूक्तमृतमित्यघमर्षणः । (190)

(191) संसं सूक्ते संवनन ऋषिरङ्गिरसः सुतः ॥ ९९ ॥

(Ṛta, son of Madhuchchanda;

Samvanana, son of Aṅgiras)

गोधा घोषा विश्ववारापालोपनिषन्निषत् ।

ब्रह्मजाया जुहुर्नामा अगस्त्यस्य स्वसादितिः ॥ १०० ॥

इन्द्राणी चेन्द्रमाता च सरमा रोमशोर्वशी ।

लोपामुद्रा च नद्यश्च यमी नारी च शश्वती ॥ १०१ ॥

श्रीर्लाक्षा सार्पराज्ञी वाक् श्रद्धा मेधा च दक्षिणा ।

रात्री सूर्या च सावित्री ब्रह्मवादिन्य ईरिताः ।

स गौतमो वामदेवो याः खिलास्ता ऋचो जगौ ॥ १०२ ॥

(The following ladies, who were seers, are acclaimed as Brahmavādinīs : Godhā, Ghoshā, Viśvavārā, Apālā, Juhu, Aditi sister of Agastya, Śachī (or Paulomi, wife of Indra), Indra-mātā (mother of Indra), Saramā (Śunī), Romaśā, Urvaśī, Lopāmudrā, Yamī, Śaśvatī, Śrīh, Lākshā, Sārpa-rājñī, Vāk (ambhraṇī), Śraddha, Medhā, Dakshiṇā, Rātrī, Sūryā and Sāvitrī.)

यैर्वेदमन्त्राः सकलाः सुदृष्टा
येनार्षानुक्रमणी प्रदिष्टा ।
नमोऽस्तु तेभ्यो मुनिपुङ्गवेभ्यो
भवन्तु ते चापि मयि प्रसन्नाः ।। १०३ ।।

इति दशमं मण्डलम् ।।

इति शौनकाचार्यकृतार्षानुक्रमणी समाप्ता ।।

APPENDIX III

ŚAUNAKA'S CHARAṆA-VYŪHA-SŪTRA

(WITH MAHIDĀSA'S BHĀSHYA)

।। शौनकीयं चरणव्यूहसूत्रपरिशिष्टम् ।।

(महीदासभाष्यसंवलितम्)

The Vedic corpus has four quarters (charaṇa, pāda); Ṛgveda, Yajurveda, Sāma-veda and Athrva-veda. Each of them has subdivisions like Śākhās, which are arranged and organized meaningfully (vyūha). This is the theme of the minor book (pariśishṭa) prepared by Śaunaka in the form of aphorisms (sūtras).

CHAPTER ONE

(concerning Ṛgveda)

प्रथमः ऋग्वेदखण्डः

महीदासभाष्यम् ।।

नत्वा श्रीशमुमेशं च गणेशं श्रीयुतं गुरुम् ।
शाखादेरिदमाख्यानं क्रियतेऽन्वेष्य यत्नतः ।। १ ।।

यथाऽनादिर्हरिः ख्यातो निदानं जगतां परम् ।
तथा वेदोऽपि शास्त्राणां स्मृत्यादीनां महाशयः ॥ २ ॥

तमगाधं च को वेत्ति विस्तीर्णत्वं विनेश्वरम् ।
तस्मात्संक्षेपतो वक्ष्ये वैदिकादिमुदे मुदा ॥ ३ ॥

ओमित्येकाक्षरं ब्रह्म नादबिन्दुकलात्मकम् ।
त्रिदेवत्वं त्रिमात्रं च स्फुटं विष्णुं सनातनम् ॥ ४ ॥

तं सर्वज्ञं जगत्सेतुं परमात्मानमीश्वम् ।
वन्दे नारायणं देवं निरवद्यं निरञ्जनम् ॥ ५ ॥

कृष्णद्वैपायनं वन्दे गुरुं वेदमहानिधिम् ।
येन चरणव्यूहेषु शाखाभेदमिमं कृतम् ॥ ६ ॥

तच्छिष्यं शौनकगुरुं वेदज्ञं लोकविश्रुतम् ।
नत्वा तु शाकलाचार्यं तथैव चाश्वलायनम् ॥ ७ ॥

एवं परम्पराप्राप्तं बालकृष्णं महागुरुम् ।
यस्य प्रसादाद् व्याख्यामि चरणव्यूहसंज्ञकम् ॥ ८ ॥

अथातश्चरणव्यूहम् व्याख्यास्यामः ॥ १ ॥

'अथ'शब्दश्च मङ्गले प्रस्तावे च। 'अथ' शब्दः पूर्वमेव मङ्गलार्थ इत्यर्थः। अतः हेत्वर्थः। चरणव्यूहः। वेदराशेः चतुर्विभागाच्चरण उच्यते। तस्य व्यूहः समुदायः। चतुर्वेदानां समुदायं व्याख्यास्याम इत्यर्थः। कथमेकवेदः? तदुक्तमारण्यके—''सर्वे वेदा सर्वे घोषा एकैव व्याहृतिः प्राण एव प्राण ऋच इत्येव विद्यात्'' (ऐत० आर० २.१०) इति। तस्य चतुर्विभागाः कृताः। तथा चोक्तं द्वादशस्कन्धे षष्ठाध्याये भागवते —

तेनासौ चतुरो वेदांश्चतुर्भिर्वदनैः प्रभुः।
सव्याहृतिकान्सोङ्कारांश्चातुर्होत्रविचक्षणाः ॥ १ ॥

पुत्रानध्यापयत्तांस्तु ब्रह्मर्षीन्ब्रह्मकोविदान्।
ते तु धर्मोपदेष्टारः स्वपुत्रेभ्यः समादिषन् ॥ २ ॥

ते परम्परया प्राप्तास्तत्तच्छिष्यैर्धृतव्रतैः।
चतुर्युगेष्वथ व्यस्ता द्वापरादौ महर्षिभिः ॥ ३ ॥

क्षीणायुषः क्षीणसत्त्वान्दुर्मेधान्वीक्ष्य कालतः।
वेदान्ब्रह्मर्षयो व्यस्यन्हृदिस्थाच्युतचोदिताः ॥ ४ ॥

अस्मिन्नप्यन्तरे ब्रह्मन् भगवाँल्लोकभावनः।
ब्रह्मेशाद्यैर्लोकपालैर्याचितो धर्मगुप्तये ॥ ५ ॥

पराशरात्सत्यवत्यामंशांशकलया विभुः।
अवतीर्णो महाभाग वेदं चक्रे चतुर्विधम् ॥ ६ ॥

ऋगथर्वयजुः साम्नां राशीनुद्धृत्य वर्गशः ।
चतस्रः संहिताश्चक्रे मन्त्रैर्मणिगणा इव ॥ ७ ॥

तासां स चतुरः शिष्यानुपाहूय महामतिः ।
एकैकां संहितां ब्रह्मन्नेकैकस्मै ददौ विभुः ॥ ८ ॥

पैलाय संहितामाद्यां बह्वृचाख्यामुवाच ह ।
वैशम्पायनसंज्ञाय निगदाख्यं यजुर्गुणम् ॥ ९ ॥

साम्नां जैमिनये प्राह तथा छन्दोगसंहिताम् ।
अथर्वाङ्गिरसीं नाम स्वशिष्याय सुमन्तवे ॥ १० ॥

पैलः स्वां संहितामूच इन्द्रप्रमतये मुनिः ।
वाष्कलाय च सोऽप्याह शिष्येभ्यः संहितां स्वकाम् ॥ ११ ॥

चतुर्द्धा व्यस्य बोध्याय याज्ञवल्क्याय भार्गव ।
पराशरायाग्निमित्रे इन्द्रप्रमतिरात्मवान् ॥ १२ ॥

अध्यापयत्संहितां स्वां माण्डूकेयमृषिं कविम् ।
तस्य शिष्यो वेदमित्रः सौभर्यादिभ्य ऊचिवान् ॥ १३ ॥

शाकल्यस्तत्सुतः स्वां तु पञ्चधा व्यस्य संहिताम् ।
वात्स्यमुद्गलशालीयगोखल्यशिशिरेश्वधात् ॥ १४ ॥

जातूकर्ण्यश्च तच्छिष्यः सनिरुक्तां स्वसंहिताम् ।
बलाकपैजवैतालविरजेभ्यो ददौ मुनिः ॥ १५ ॥

वाष्कलिः प्रतिशाखाभ्यो वालखिल्याख्यसंहिताम् ।
चक्रे बालाय निर्भज्य कासाराश्चैव तां दधुः ॥ १६ ॥

बह्वृचा संहिता ह्येता एभिर्ब्रह्मर्षिभिर्धृताः ।
श्रुत्वैतच्छंदसां व्यासं सर्वपापैः प्रमुच्यते ॥ १७ ॥

According to *Vāyu-purāṇa,* the transmission is as follows :

The sage Paila is responsible for the Ṛgvedic division. He had two disciples, Indra-pramati and Vāshkala. Two disciples of the former were Mārkaṇḍeya and Ruru. In Mārkaṇḍeya's line came Satyaśravas, Devamitra-Śākalya, Rathantara and Vāshkali-Bhāradvāja. In Ruru's live came Śunaka and his son Śaunaka. Vāshkali-Bhāradvāja's students Golaka, Mudgala, Khāliya, Śaiśri and Matsya had each of them his own recension. Vāshkala, the other disciple of paila had four prominent students: Bodha, Agnimāṭhara, Parāśara and Yajñavalkya.

However, the lineage given by Śaunaka is different. After Vyāsa, Paila passed on Ṛgveda to his disciple Indra-pramati, who transmitted it to six of his desciples (Agnimitra and others) and also to his own son Māṇḍūkya. Māṇḍūkya's desciple was Veda-mitra (or Deva-mitra), who passed it on to his

own son, Saubharī and others. Then the recipent was Śākalya, who was followed by his student Jātūkarṇya. By this time, Nirukta was already prepared. The entire mars of Ṛgvedic recension (including Nirukta) was received by the students of Jātūkarṇya, Balāka, Paija, Vaitāla and Virāja. Indra-pramati had Bāshkala as one of his disciples. His son Bāshkali was responsible for the compilation of Vālakhilya-sūktas.

अस्यार्थः— व्यासात्पैलः संहितां पदक्रमं च त्रिविधरूपं पठित्वा इन्द्रप्रमतये ददौ । इन्द्रमतिश्चतुर्धा जटान्तं व्यासं कृत्वा वाष्कलादि अग्निमित्रान्तषट्शिष्येभ्यः स्वसुताय माण्डूकेयाय च ददौ । माण्डूकेयस्य शिष्यो वेदमित्रस्तस्य पुत्रेभ्यः सौभर्यादिभ्यस्तैः स्वसुताय शाकल्याय ददौ । शाकल्यशिष्यो जातूकर्ण्यः सनिरुक्तां संहितां बलाकपैजवैतालविरजेभ्यो ददौ । पूर्वोक्तबाष्कलपुत्रो बाष्कलिः पूर्वोक्तसर्वशाखाभ्य उद्धृत्य बालखिल्यसंहितां चक्रे । तां नाम्नीं बालखिल्यसंहितां वालायनिप्रभृतयोऽधीतवन्तः । इति पदेषु संहितात्वमितिकरणवेष्टनं, उदात्तानुदात्तस्वरितस्वराणां सिद्धिः, एतच्छन्दसां व्यासं विस्तारं श्रुत्वा सर्वपापैः प्रमुच्यत इत्यर्थः ।

तथा च विष्णुपुराणे—

ब्रह्मणा चोदितो व्यासो वेदान्यस्तु प्रचक्रमे ।
अथ शिष्यात्स जग्राह चतुरो वेदपारगान्　　॥ १ ॥

ऋग्वेदश्रावकं पैलं सञ्जग्राह महामतिः ।
वैशम्पायननामानं यजुर्वेदस्य चाग्रहीत्　　॥ २ ॥

जैमिनिः सामवेदस्य तथैवाथर्ववेदवित् ।
सुमन्तुस्तस्य शिष्योभूद्वेदव्यासस्य धीमतः ॥ ३ ॥

तथा च गृह्यसूत्रम्— ''सुमन्तुजैमिनिवैषम्पायनपैलसूत्रभाष्यभारतमहाभारतधर्माचार्या'' (आश्व० गृ० सू० ३.४.४) इति । 'जानन्ति बाहवी' इत्यारभ्य 'माण्डूकेया' (आश्व० गृ० सू० ३.४.४) इत्यन्तं माण्डूकगणसमुदायः । 'गर्गी वाचक्नवी'त्यारभ्य 'शाङ्खायनम्' (आश्व० गृ० सू० ३.४.४) इत्यन्तेन शाङ्खायनगणः । एतेषां कौषातकिब्राह्मणमारण्यकं शाङ्खायनसूत्रं चेति । 'एतरेय'मित्यारभ्य 'आश्वलायनम्' (आश्व० गृ० सू० ३.४.४) इत्यन्ता आश्वलायनगणः । एषामैतरेयब्राह्मणमारण्यकमाश्वलायनसूत्रं च इत्यर्थः ॥ १ ॥

तत्र यदुक्तं चातुर्वेद्यं चत्वारो वेदा विज्ञाता भवन्ति ॥ २ ॥

अस्मिन् ग्रन्थे यदुक्तं चातुर्वेद्यं तेन चत्वारो वेदा विज्ञाता भवन्ति ॥ २ ॥

तत्र ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदश्चेति ॥ ३ ॥

इति स्पष्टार्थः । ''वेदा हि यज्ञार्थमभिप्रवृत्ताः'' (श्रीलगधज्योतिषम् ७) ।

तथा च विष्णुपुराणम्—

आद्यो वेदश्चतुष्पादः शतसाहस्रसम्मितः ।
ततो दशगुणः कृत्स्नो यज्ञोऽयं सर्वकामधुक् ॥ १ ॥

अत्रैव मत्सुतो व्यास अष्टाविंशतिमेऽन्तरे ।

वेदमेकं चतुष्पादश्चतुर्धा व्यभजत्प्रभुः ॥ २ ॥

अस्यार्थः— आद्यो वेदो वेदविभागात्पूर्वकालीनो वेदश्चतुष्पादः ऋगादि चतुष्टयसमूहरूपः । शतसाहस्रसम्मितः । ''दश दश तच्छतं दशशतानि, तत्सासहस्रं तत्सर्वम्'' इति श्रुतेः । अनन्तसङ्ख्याकः । ''अनन्ता वै वेदाः'' इति श्रुतेः । ततो वेदात्प्रवृत्तः कृत्स्नोऽयं दशगुणः—दशविधः । ''स एष यज्ञः पञ्चविधोऽग्निहोत्रं दर्शपौर्णमासौ चातुर्मास्यानि पशुः सोम'' (ऐत० आर० २.१५) इति श्रुतेः । तथा च— ''पञ्च वा एते महायज्ञा'' इत्युपक्रम्य ''ब्रह्मयज्ञो देवयज्ञः पितृयज्ञो भूतयज्ञो मनुष्ययज्ञ'' इति श्रुतेश्च । वैतानिका गार्ह्यश्चि दशयज्ञाः । अत्रान्तरे वैवस्वतमन्वन्तरे अष्टाविंशतिमे द्वापरयुगे इति शेषः । मत्सुतो व्यासः कृष्णद्वैपायनश्चतुर्धा व्यभजत् । ऋग्वेदादिरूपेण चतुर्धा विभक्तवान् । पाकयज्ञास्त्रिविधाः । अत्र गृह्यम् ''हुता अग्नौ हूयमाना अनग्नौ प्रहुता ब्राह्मणभोजने ब्रह्मणि हुताः'' (आश्व० गृ० सू० १.१.३.) इति । अत्र वृत्तिकृत्— अग्नौ हूयमाना 'हविष्यस्य जुहुयात्' इत्येवमादयो हुताः । अनग्नौ क्रियमाणा 'अथ बलिहरण'मित्येवमादयः प्रहुताः । ब्राह्मणभोजनं यत्रास्ति 'ब्राह्मणान्भोजयित्वा' इति ब्रह्मणि हुताः इतिः । नित्याभ्यासो ब्रह्मयज्ञः पारायणं च । अत्र गृह्यसूत्रं ब्रह्मयज्ञखण्डे— यदृचोऽधीते पय आहुतिभिरेव तद्देवतास्तर्पयति यद्यजूंषि घृताहुतिभिर्यत्सामानि मध्वाहुतिभिर्यदथर्वाङ्गिरसः सोमाहुतिभिर्यद्ब्राह्मणानि कल्पान् गाथा नाराशंसीरितिहासपुराणानीत्यमृताहुतिभिर्यदृचोऽधीते पयसः कुल्या अस्य पितॄन्स्वधा उपक्षरन्ति'' (आश्व०गृ०सू० ३.३.२-३.) इति ॥ ३ ॥

तत्र ऋग्वेदस्याष्टस्थानानि भवन्ति ॥ ४ ॥

तत्र ऋग्वेदस्याष्टभेदा भवन्ति । शाकलावाष्कलौ, ऐतरेयब्राह्मणारण्यकौ, शाङ्खायनमाण्डूकौ, कौषीतकीयब्राह्मणारण्यकावित्यष्टभेदा । अन्येऽष्टभेदाः यथा—

वेदा विकृतिशाखाश्च भेदस्तु त्रिविधस्तथा।
पृथङ्नानाविधानेन व्यासेन कथितं पुरा ॥ १ ॥ इति।

अत्राष्टभेदेनाष्टस्थानेन वा विकृतिर्ग्राह्या। विकृतिस्तु अग्रे वक्ष्यामः। तस्माद्ब्रह्मयज्ञार्थे पारायणार्थे च ऋग्वेदस्याध्ययनं कर्तव्यम् ॥ ४ ॥

ततश्चतुष्पदेन वक्ष्यति—

चर्चा श्रावकः चर्चकः श्रवणीयपारः ॥ ५ ॥

चर्चा अध्ययनम्। तत्र पाणिनीयसूत्रे—"चिन्ति पूजि कथि कुम्बि चर्चश्च।" एभ्योऽङ्स्त्रियां भावादौ। चिति स्मृत्याम्। पूजि पूजायाम्। कथि वाक्यप्रबन्धे। कुबि आच्छादने। चर्च अध्ययने। चुरादय इति। अष्टाध्यायीसूत्रे ताल्वोष्ठपुटव्यापारेण शब्दस्य श्रवणं क्रियते सा चर्चा। तदध्ययनस्य श्रावको गुरुः। तस्य चर्चकः शिष्यः। श्रवणीयपारः। श्रवणीयो वेदः तस्य पारः समाप्तिः। इति चतुष्पदेन अध्ययनं सूचितम्। अग्रे चतुष्पदेन चत्वारि पारायणानि सूचयति। तत्पारायणं द्विविधं प्रकृतिविकृतिरूपम्। का प्रवृत्तिः? का विकृतिः? प्रकृतिः संहिता। सा द्विविधा। रूढा योगा। रूढा यथा— "अग्निमीले पुरोहित"मिति। योगा यथा— "अग्निमीले। ईले पुरोहितम्।" इति प्रातिशाख्ये द्वितीयपटले भाष्यकारेण व्याख्यातम् ॥ ॥ ५ ॥

अथ चतुष्पारायणं यथा—

क्रमपारः क्रमपदः क्रमजटः क्रमदण्डश्चेति चतुष्पारायणम् ॥ ६ ॥

क्रमशब्द उभयसंहिता वाच्यः । स कथम् ?

अनुलोमविलोमाभ्यां त्रिवारं हि पठेत्क्रमम् ।
विलोमे पदवत्सन्धिरनुलोमे यथाक्रमम् ।। १ ।।

यथाक्रमं यथासंहिता इत्यर्थः । अन्यच्च वर्णक्रमः 'अक्षरसमाम्नाय एव' इत्यारण्यके । ''कथमभिष्टुयादित्यक्षरशाः । चतुरक्षरशाः । पच्छाः । अर्द्धर्चशाः ऋक्शाः इति'' (ऐत० ब्रा० ६.२.) ब्राह्मणम् । ''भूयांसि तु समाम्नानात् व्यञ्जनमात्रं तु तत्तस्याभिधानस्य भवति'' (निरु०उ० ६.१.१३) इति नैरुक्ताः । क्रमः संहितावाची कथम् ? ''पदप्रकृतिः संहिता'' (निरु०पू० ६.१७) इति नैरुक्तवचनात्सा क्रमरूपा इत्यर्थः । क्रमपदः । क्रमः संहिता तस्याः पदानि । इति द्वे प्रकृति पारायणे द्वे विकृतिरूपे । विकृतिस्तु अष्टविधा भवन्ति । तच्च—

जटा माला शिखा रेखा ध्वजो दण्डो रथो धनः ।
अष्टौ विकृतयः प्रोक्ताः क्रमपूर्वा महर्षिभिः ।। २ ।। इति ।

आसां मध्ये जडादण्डयोः प्राधान्यम् । तत्कथम्? जटानुसारिणी शिखा । दण्डानुसारिणी माला लेखा ध्वजो रथश्च । धनस्तूभयानुसारित्वात् । अस्याः नियमवाक्यानि व्याडीकृतजटापटले उदाहरणानि च ।

तत्र जटावाक्यम्—

क्रमे यथोक्ते पदजातमेव द्विरभ्यसेदुत्तरमेव पूर्वम् ।
अभ्यस्य पूर्वं च तथोत्तरे पदेऽवसानमेव हि जडाभिधीयते ।। ३ ।।

अस्यार्थः— क्रमे यथोक्ते सति ''क्रमो द्वाभ्याम्'' इत्याद्युक्ते क्रमप्रकारे पदजातं पदद्वयं वा पदत्रयं वा द्विवारमभ्यसेत्। द्विवारं पठेत्। अभ्यासप्रकारः— उत्तरमेव पूर्वम्। क्रमवत्पदद्वयं गृहीत्वा पूर्व नाम प्रथमं उत्तरपदमभ्यसेत्। तत उत्तरपूर्वपदयोः सन्धानद्वारा पूर्वं द्विरभ्यस्योत्तरे पदेऽवसानम्। एवं प्रकारेणाध्ययनं जटाभिधीयते कथ्यते। हीति निश्चयार्थम्। उदाहरणेन दृश्यते— 'अग्निमीडऽईडेग्निमग्निमीडे। ईडे पुरोहितं पुरोहितमीडऽईडे पुरोहितम्' इत्यादि ज्ञेयम्।

अथ दण्डलक्षणम्—

क्रममुक्त्वा विपर्यस्य पुनश्च क्रममुत्तरम्।
अर्द्धर्चादेवमुक्तोऽयं क्रमदण्डोऽभिधीयते॥ ४॥

उदाहरणं यथा- 'अग्निमीडे। ईडेग्निम्। अग्निमीडे। ईडे पुरोहितम्। पुरोहितमीडेग्निम्' इत्यादि ज्ञेयम्।

अथ मालालक्षणम्—

ब्रूयात्क्रमविपर्यासावर्द्धर्चस्यादितोऽन्ततः।
अन्तं चादि नयेदेवं क्रममालेति गीयते॥ ५॥

माला मालेव पुष्पाणां पदानां ग्रन्थिनी हि सा।
आवर्तन्ते त्रयस्तस्यां क्रमव्युत्क्रमसङ्क्रमाः॥ ६॥

अथ शिखालक्षणम्—

पदोत्तरां जटामेव शिखामार्याः प्रचक्षते॥ ७॥

अथ रेखालक्षणम्——

क्रमाद् द्वि त्रि चतुष्पञ्च पदक्रममुदाहरेत् ।
पृथक्पृथग्विपर्यस्य लेखामाहुः पुनः क्रमात् ॥ ८ ॥

अथ ध्वजलक्षणम्——

ब्रूयादादेः क्रमं सम्यगन्तादुच्चारयेद्यदि ।
वर्गे च ऋचि वा यत्र पठनं स ध्वजः स्मृतः ॥ ९ ॥

अथ रथलक्षणम्——

पादशोऽर्द्धर्चशो वाऽपि सहोक्त्या दण्डवद्रथः ॥ १० ॥

अथ धनलक्षणम्——

जटामुक्त्वा विपर्यस्य तत्पदानि पुनः पठेत् ।
अयं धन इति प्रोक्तः इत्यष्टौ विकृतीः पठेत् ॥ ११ ॥

अन्यच्च धनस्य द्वितीयलक्षणम् ——

अन्तात्क्रमं पठेत्पूर्वमादिपर्यन्तमानयेत् ।
आदिक्रमं नयेदन्तं धनमाहुर्मनीषिणः ॥ १२ ॥

इत्यष्टविकृतिलक्षणान्युक्तानि । अध्ययने संहितापारायणं पदपारायणं जटापारायणं क्रमदण्ड-पारायणञ्च एतात्पारायणचतुष्टयमित्यर्थः ।। ६ ।।

एतेषां शाखाः पञ्चविधा भवन्ति ।। ७ ।।

एतेषां वेदपारायणानां पञ्च शाखा भवन्तीत्यर्थः ।। ७ ।।

ताः का इत्यत आह—

आश्वलायनी शाङ्खायनी शाकला वाष्कला माण्डूकायनाश्चेति ।। ८ ।।

इति प्रसिद्धाः ।। ८ ।।

तेषामध्ययनम् ।। ९ ।।

तेषां आश्वलायनीयादिशाखानां समानाध्ययनं सूचयति ।। ९ ।।

अध्यायाश्च चतुःषष्टिर्मण्डलानि दशैव तु ।। १० ।।

अध्यायाश्चतुःषष्टि । 'अग्निमीडे' 'अयं देवाय' इत्यादि चतुःषष्टिरध्याया इत्यर्थः । मण्डलानि दशैव तु । 'अग्निमीले' 'कुसुम्भक' इत्याद्युपाकर्म-प्रसिद्धानीत्यर्थः ।। १० ।।

वर्गाणां परिसंख्यातं द्वे सहस्रे षडुत्तरे।
सहस्रमेकं सूक्तानां निर्विशङ्कं विकल्पितम्।
दशसप्तसु पठ्यन्ते संख्यातं वै पदक्रमम्॥ ११॥

वर्गादि आऋचान्ताः सङ्ख्या वालखिल्यैर्विना ज्ञेया। षडुत्तरसहस्रद्वयवर्गा (२००८) इत्यर्थः। सहस्रमेकं सूक्तानां निर्विशङ्कं विकल्पितम्। दशसप्तसु पठ्यन्ते सप्तदशाधिक सहस्र सूक्तानीत्यर्थः (१०१७)। सङ्ख्यातं वै पदक्रमं एकं शतसहस्रं वा द्विपञ्चाशत्सहस्रार्द्धमेतानि चतुर्दशपदानि वासिष्ठानामितरेषां पञ्चाशीतिः। एक लक्ष द्विपञ्चाशत्सहस्रपञ्चशतचतुर्दश (१५२५१४) वासिष्ठानाम्। वासिष्ठगोत्रीयाणां 'इन्द्रोतिभिः' (अष्ट० ३ अ० ३, वर्ग २३) एक सप्तति पदात्मको वर्गो नास्ति। इतरगोत्रीयाणां पञ्चाशीत्यधिक पदानीत्यर्थः। अथ वालखिल्यसहिता पदसङ्ख्योच्यते—

लक्षैकं तु त्रिपञ्चाशत्सहस्रं शतसप्तकम्।
पदानि च द्विनवतिः प्रमाणं शाकलस्य च ॥ १ ॥

एकलक्षत्रिपञ्चाशत्सहस्रसप्तशतद्विनवतिश्चाधिकानि (१५३७९२) पदानीत्यर्थः।

पदानि वालखिल्यस्य ह्यर्कसङ्ख्याशतानि च।
अधिकानि तु सप्तैव वर्गा अष्टादश स्मृताः ॥ २ ॥

सप्ताधिकद्वादशशतानि (१२०७) पदानीत्यर्थः। इत्याश्वलायनानाम्। शाङ्खायनानां तु वालखिल्य सहितपदसङ्ख्योच्यते—

शाकल्यदृष्टे पदलक्षमेकं सार्द्धन्तु वेदे त्रिसहस्रयुक्तम् ।
शतानि सप्तैव तथाऽधिकानि चत्वारि त्रिंशच्च पदानि चर्चा ॥ ३ ॥

शाकल्यो माण्डूकगणस्थः । संहिता पदानि— एकलक्षत्रिपञ्चाशत्सहस्रसप्तशतचतुस्त्रिंशदधिकानि (१५३७३४) पदानीत्यर्थः ।

पदानि वालखिल्यस्य रुद्रसङ्ख्याशतानि च ।
षट्पञ्चाशदधिकानि वर्गाः सप्तदशास्तथा ॥ ४ ॥

एकादशशतषट्पञ्चाशदधिकवालखिल्ये पदानि (११५६) इत्यर्थः । अष्टपञ्चाशत्पादात्मकऋक्त्रयस्य 'यमृत्विजो' (अष्ट० ६, अ० ४, वर्ग २९) वर्गो नास्ति । न तु हविष्पान्तीयसूक्ते 'द्वे समीची' (अष्ट० ८ अ० ४ वर्ग १३) वर्गे त्रिऋचानन्तरमेक एवाग्निर्ऋक् । 'यमृत्विजो' ऋक् खिलरूपेण पठन्ति । 'ज्योतिष्मन्तम्' (अष्ट० ६ अ० ८ वर्ग २९) ऋचाभावः ऋक्त्रयस्य तेषामन्ते पदाभावत्वात् । अन्ते वर्गसमाप्तौ यावन्मात्रमृचं पठन्ति । एवं 'द्वे समीची' इति षड्ऋचो वर्गः । आश्वलायनानां चतुर्ऋचात्मको वर्गः । इत्याश्वलायनशाङ्खायनशाखयोर्भेदरध्ययन इत्यर्थः । यस्य मन्त्रस्य पदाभावस्तस्य खैलिकत्वं सिद्धम् । तर्हि त्र्यम्बक यजामहे' (अष्ट० ५ अ० ४ वर्ग ३०) इति मन्त्रस्य पदाभावात्तस्य खैलिकत्वं सिद्धम् । न हि उमागानात् उपलेखायाम् । 'त्र्यम्बकं' (अष्ट० ५ अ० ४ वर्ग ३०) प्रथमम् 'भद्रं नः' (अष्ट० ७ अ० ७ वर्ग २) 'प्रजापते' (अष्ट० ८ अ० ७ वर्ग ४) 'ऋतं च' (अष्ट० ८ अ० ८ वर्ग ४०) इति पदक्रममिममुमयाभिगीध्वम् । अर्द्धर्चान्ते पदगीतम् । तस्मात्पदकाले क्रमकाले च पठन्ति । ''क्रमो द्वे पदश'' इति वचनात् । अत्र द्वितीयपदं नास्ति अर्द्धर्चान्तसमापनात् । क्रमाभावः । तस्मात्पदकाले क्रमकाले पठनं स एवं पदक्रम इत्यर्थः । क्रमकाले तु वेष्टव्यं चतुस्त्रिंशत्सहस्राणि—

षत्वे णत्वे च दीर्घत्वे आकारे सानुनासिके।
त्रिचतुष्पञ्चक्रमे अर्द्धर्चान्ते च वेष्टयेत् ॥ ५ ॥

क्रमेणोदाहरणानि ज्ञातव्यानि— 'सुषुमायातम्' (अष्ट० २ अ० २ वर्ग १), 'मो षुणः' (अष्ट० १ अ० ३ वर्ग १६), 'वाजेषु सा सहिर्भव' (अष्ट० ३ अ० २ वर्ग २२), 'आँ उपानसः' (अष्ट० ८ अ० ५ वर्ग २६), 'न्याविध्यदिलीविशस्य' (अष्ट० १ अ० ३ वर्ग ३), 'अगादारैगुकृष्णा' (अष्ट० १ अ० ८ वर्ग १), 'निरुस्वसारमस्कृतोषसम्' (अष्ट० ८ अ० ७ वर्ग १४), 'अग्निमीडे' 'ऋत्विजमित्यृत्विजम्' इति। चतुस्त्रिंशत्सहस्राणि (३४०००) क्रमकाले वेष्टनानीत्यर्थः।

द्विखण्डानां सहस्राणां द्वात्रिंशत्षोडशोत्तरा ॥ ६ ॥

षोडशोत्तर द्वात्रिंशत्सहस्राणि (३२०१६) द्विखण्डानीत्यर्थः। चत्वारिंशत्सहस्राणि द्वात्रिंशतं चाक्षरसहस्राणि। चतुर्लक्षद्वात्रिंशत्सहस्राक्षराणि (४,३२,०००) इत्यर्थः। द्वात्रिंशतं चाक्षरसहस्राणीत्यर्थसमाप्तेः पुनर्वचनमुक्तम्।

अथ पारायणे ऋक्परिमाणा उच्यन्ते—

ऋचां दशसहस्राणि ऋचां पञ्चशतानि च।
ऋचामशीतिपादश्चैतत्पारायणमुच्यते ॥ १७ ॥

एतत्पारायणं वालखिल्यैर्विना सङ्ख्यातम्। वालखिल्यानि पारायणे न सन्ति। तदुच्यते—ऋग्वेदान्तर्गत वालखिल्यमेकादशसूक्तम्। सूक्तसहस्रसप्तदशाधिकमित्यत्र ऋचां दशसहस्राणीत्येत-

त्सङ्ख्याव्यतिरिक्तानि वालखिल्यानीति प्रसिद्धिः । तत्र यज्ञानुष्ठाने ब्राह्मणे सूत्रे च श्रूयते— ''वालखिल्याः शंसन्ति प्राणा वै वालखिल्याः'' (ऐत० ब्रा० ६.२८) इति । ''अभि प्र वः सुराधसम् (अष्ट० ६ अ० ४ वर्ग १४) इति षड् बालखिल्यानां सूक्तानि'' (ऐत० आ० ५.१०) इति ब्राह्मणे आरण्यके । 'अथ वालखिल्या विहरेत् तदुक्तं षोडशिना' इति सूत्रकारः । श्रौतस्मार्तसर्वकर्मानुष्ठाने वालखिल्यप्रसिद्धिः । वेदपारायणे वर्जमित्यर्थः । शौनकाचार्यवचनात् । यथा प्रैषाध्याय कुन्तपाध्याय निविदाध्याय सुपर्णाध्यायश्चेति । तद्वद्वालखिल्याध्याय इत्यर्थः । वालखिल्यसहिता सर्वानुक्रमणीयमन्त्ररूपीऋक्सङ्ख्योच्यते— द्विपञ्चाशदधिकपञ्चशतदशसहस्राणीति (१०,५५२) । वालखिल्यव्यतिरिक्तसङ्ख्या तु द्विसप्तत्यधिकचतुःशतदशसहस्रऋक् (१०४७२) । एतत्सङ्ख्या नित्या द्विपदा नैमित्तिकद्विपदा सहिता उक्ता । हवनाध्ययनाभ्यां समाना सा नित्या द्विपदा । आसां सङ्ख्या उपलेखायाम् । तच्च 'साधुः' (अष्ट० १ अ० ५ वर्ग १४), 'असिक्न्यां' (अष्ट० ३ अ० ५ वर्ग २३), 'सिषक्तु न (अष्ट० ४ अ० २ वर्ग १६), 'उरौ देवा' (अष्ट० ४ अ० २ वर्ग १९), 'उरौ देवा' (अष्ट० ४ अ० २ वर्ग २२), 'विद्वेषांसी' (अष्ट० ४ अ० ५ वर्ग १२), 'अया वाजं' (अष्ट० ४ अ० ६ वर्ग ३), 'महिराधः' (अष्ट० ४ अ० ७ वर्ग ३४), 'आवां सुम्ने' (अष्ट० ५ अ० १ वर्ग ४), 'ते ते देवाय' (अष्ट० ५ अ० २ वर्ग २३), 'रायस्कामः' (अष्ट० ५ अ० ३ वर्ग १७), 'प्रति न स्तोम' (अष्ट० ५ अ० ३ वर्ग २७), 'स्वायुधासः' (अष्ट० ५ अ० ४ वर्ग २४), पितुर्न पुत्रः' (अष्ट० ६ अ० १ वर्ग ३४), 'स नो वाजेषु' (अष्ट० ६ अ० ४ वर्ग ३), 'गावो न यूथं' (अष्ट० ६ अ० ४ वर्ग ६), 'पवस्व सोममन्दयन्' (अष्ट० ७ अ० २ वर्ग १६) इति तिस्रः, 'परिसुवानो' (अष्ट० ६ अ० ८ वर्ग ८), 'नृभिर्ये मा नः' (अष्ट० ७ अ० ५ वर्ग १५), 'प्रत्यञ्चमर्कमनयञ्छचीभिः' (अष्ट० ८ अ० ८ वर्ग १५), इति द्विपदैकपदा द्वाविंशतिः । तासां सप्तदश द्विपदा एकपदाः पञ्च इति । हवनाध्ययने विपरीता सा नैमित्तिक द्विपदा । ता आह वर्गरूपेण— 'पश्वानतायु' (अष्ट० १ अ० ५ वर्ग ९) दश, 'रयिर्न' (अष्ट० १ अ० ५

वर्ग १०) दश, 'वनेषु' (अष्ट० १ अ० ५ वर्ग ११) दश, 'श्रीणं' (अष्ट० १ अ० ५ वर्ग १२) दश, 'शुक्रः शुशुकाँ' (अष्ट० १ अ० ५ वर्ग १३) दश, वनेम पूर्वीः' (अष्ट० १ अ० ५ वर्ग १४) दश, 'अग्ने त्वन्नः' (अष्ट० ४ अ० १ वर्ग १६) चत्वारि, 'अग्ने भव' (अष्ट० ५ अ० २ वर्ग २३) षट्, 'प्रशुक्रैतु' (अष्ट० ५ अ० ३ वर्ग २५) दश, 'राजा राष्ट्राणां' (अष्ट० ५ अ० ३ वर्ग २६) दश, 'क ई व्यक्ता' (अष्ट० ५ अ० ४ वर्ग २३) दश, 'बभ्रुरेको' (अष्ट० ६ अ० २ वर्ग ३६) दश, 'परिप्रधन्व' (अष्ट० ७ अ० ५ वर्ग २०) दश, 'तन्ते सोतारो' (अष्ट० ७ अ० ५ वर्ग २१) द्वादश, 'इमा नु कं' (अष्ट० ८ अ० ८ वर्ग १५) चत्वारि, 'आयाहि वनसा' (अष्ट० ८ अ० ८ वर्ग ३०) चत्वारीति नैमित्तिकद्विपदा चत्वारिंशोत्तरशतम् (१४०) इति।

हवने एकैका। अध्ययने द्वे द्वे। आसामन्त्या एका उर्वरिता सा नित्या द्विपदा। उक्तं च परिभाषायाम् 'विंशिका द्विपदा विराजस्तदर्द्धमेकपदा द्विर्द्विपदास्तृचः समामनन्ति। आयुक्ष्वन्त्या द्विपदैव' (परि० खं० १२) इति। द्विर्द्विपदास्तृचः समामनन्ति। यस्य सूक्तस्य द्विर्द्विपदाः समामनन्ति तास्तृचः अध्ययने चतुष्पदाः कृत्वेत्यर्थः। आयुक्ष्वान्त्या द्विपदैव। सूक्तस्यर्चा युजो या न भवति तास्त्वन्त्या नित्या द्विपदैव एवमध्ययने द्वावर्द्धर्चे ऋगेव प्राधान्यम्। त्रीण्यर्द्धर्चायाः कथम्? तत्रापि द्वावर्द्धर्चावेका ऋचा। अर्द्धर्चा एका कर्तव्या। अध्ययनसम्प्रदायबलात्। 'अनादेशेऽष्टाक्षराः पादाश्चतुष्पदाश्चर्च' (परि० खं० ३) इति परिभाषायाम्। अध्ययने त्रीण्यर्द्धर्चैऋगेव सम्प्रदायो नास्ति। आसां परिमाणमाह— 'अग्निं होतारम्' (अष्ट० २ अ० १ वर्ग १२) पञ्च, 'सहिशर्द्धोनि' (अष्ट० २ अ० १ वर्ग १३) षड्, 'अयं जायत' (अष्ट० २ अ० १ वर्ग १४) पञ्च, 'विश्वो विहायाः' (अष्ट० २ अ० १ वर्ग १५) तिस्रः, 'यं त्वं रथम्' (अष्ट० २ अ० १ वर्ग १६) पञ्च, 'प्रतद्वोचे यम्' (अष्ट० २ अ० १ वर्ग १७) षट्, 'एन्द्र याह्यु पुनः' (अष्ट० २ अ० १ वर्ग १८) पञ्च, 'इमां ते वाचम्' (अष्ट० २ अ० १ वर्ग १९) चत्वारि 'स नो नव्येभि'

(अष्ट० २ अ० १ वर्ग १९) वर्जम्। 'इन्द्राय हि द्यौः' (अष्ट० २ अ० १ वर्ग २०) सप्त, 'त्वया वयम्' (अष्ट० २ अ० १ वर्ग २१) षड्, 'अवर्म ह' (अष्ट० २ अ० १ वर्ग २२) एका, 'वनोति हि' (अष्ट० २ अ० १ वर्ग २२) एका, 'आ त्वा जुवो' (अष्ट० २ अ० १ वर्ग २३) षट्, 'स्तीर्णम्' (अष्ट० २ अ० १ वर्ग २४) पञ्च, 'इमे वां सोमा' (अष्ट० २ अ० १ वर्ग २५) एका, 'इमे ये ते सुवायो वा' (अष्ट० २ अ० १ वर्ग २५) एका, 'प्रसुज्येष्ठम्' (अष्ट० २ अ० १ वर्ग २६) षड्, 'ऊती देवानाम्' (अष्ट० २ अ० १ वर्ग २६) वर्जम्। 'सुषुमायातम्' (अष्ट० २ अ० २ वर्ग १) त्रीणि, 'प्रप्रपूष्णः' (अष्ट० २ अ० २ वर्ग २) चतुष्कम्, 'अस्तु श्रौषट्' (अष्ट० २ अ० २ वर्ग ३) वर्जम्। 'वृषन्निन्द्र' (अष्ट० २ अ० २ वर्ग ४) पञ्च, 'ये देवासो' (अष्ट० २ अ० २ वर्ग ४) वर्जम्। 'तवत्यन्नर्यम्' (अष्ट० २ अ० ६ वर्ग २८) एका, 'सखे सखायम्' (अष्ट० ३ अ० ४ वर्ग १२) एका, 'अयारुचा' (अष्ट० ७ अ० ५ वर्ग २३) त्रीणि, एतास्त्रीणि त्रीण्यर्द्धर्चा ऋचा हवनीयाश्चतुर्नवतिसङ्ख्या। इति त्रीण्यर्द्धर्चे ऋग्धवने। अध्ययने अर्द्धर्चद्वयेन ऋगेका। अर्द्धर्चेनैकैव ऋग्द्वये कर्तव्य इत्यर्थः। एकर्चस्य ऋग्द्वयं विराट्छन्दो विना कथं भवति इत्याशङ्क्य तत्रोच्यते विराट्छन्दः सर्वच्छन्दसि व्याप्तं वर्तते। उक्तं चारण्यके "चत्वारः पुरुषा इति बाध्वः शरीरपुरुषश्छन्दपुरुषो वेदपुरुषो महापुरुष इति" (शां० आ० ८.३)। "तस्योष्णिग्लोमानि त्वग्गायत्री त्रिष्टुप्मांसमनुष्टुप् स्नावान्यस्थि जगती पङ्क्तिर्मज्जा प्राणो बृहती" (ऐत० आ० २.६) इति। "यान्येतानि विराट् चतुर्थान्येवमुहैवैवं विदुष एतदहः सर्वैश्च्छन्दोभिः प्रतिपन्नं भवति" (ऐत० आ० १.१२) इति प्राप्तो भवतीत्यर्थः। "गायत्रीश्च पङ्क्तीश्च व्यतिषजति गायत्रो वै पुरुषः पाङ्क्ताः पशव" इति ब्राह्मणम्। अत्रोदाहरणम् "पवस्व सोम मन्दयन् (अष्ट० ७ अ० २ वर्ग १६) तिस्रो नित्यद्विपदा गायत्र्यः" इति सर्वानुक्रमण्याम्। "द्विपादै पुरुषो वीर्यं त्रिष्टुब्विराड्भ्यामनयोर्द्वाविंशयोर्द्विपदयोरयं पुरुषः"। *अत्रोदाहरणानि*— "आवां सुम्ने वरिमन्" (अष्ट० ५ अ० १ वर्ग ४), "प्रत्यञ्चमर्कमनयन्" (अष्ट० ८ अ० ८ वर्ग १५), परिसुवानो गिरिष्ठाः" (अष्ट० ६ अ० ८ वर्ग ८) जगती पाद इति। एवं सर्वव्याप्तो

भवतीत्यर्थः। ''छन्दाँसि जज्ञिर'' इति श्रुतिः। तथा च शतपथब्राह्मणे— ''किञ्छन्द का देवता प्रतिष्ठेऽइति द्विपदा छन्दो, विष्णुर्देवता प्रतिष्ठे'' इति। यथा विष्णुः सर्वव्याप्तस्तथा विराट् छन्द इत्यर्थः। विराट् छन्दस्तु चतुष्पदा। त्रीण्यर्द्धर्चायां पञ्चपदा ऋक्कर्तव्येति। किं प्रमाणं तत्रोच्यते—

एकपाद्भूयो द्विपदो विचक्रमे द्विपात्त्रिपादमभ्येति पश्चात्।

चतुष्पादेति द्विपदामभिस्वरे सम्पश्यन्पङ्क्तीरुपतिष्ठमानः॥

(अष्ट० ८ अ० ६ वर्ग १३)

एकपदा द्विपदा नित्या द्विपात्त्रिपादमभ्येति। एकीभूता भवन्तीत्यर्थः। अस्योदाहरणम्— ''अग्निं होतारं मन्ये०'' (अष्ट० २ अ० १ वर्ग २२)। अग्रे अर्द्धर्चा— ''घृतस्य विभ्राष्टिम्०'' (अष्ट० २ अ० १ वर्ग १२) इति द्विपदा। चतुष्पदा तु— ''पश्वानतायुम्०'' (अष्ट० १ अ० ५, वर्ग ९)। एकार्द्धर्चा त्रिपदा, एकार्द्धर्चा द्विपदा, एका ऋक् पञ्चपदा अध्ययने। 'द्विद्विपदास्तृचः समामनन्ति' इत्यत्र समपादग्रहणात्। असमानपदा विरुद्धा, तर्हि पङ्क्तिच्छन्दो पञ्चपदा भवति। तस्य द्वितीयभेदो विराट् तस्मात्पञ्चपादत्वं प्राप्तम्। समपादा वा असमपादो विराट्छन्द इत्यर्थः। अत्र श्रुतिः— ''समौ चिद्धस्तो न समं विविष्टः सम्मातरा चिन्नासमं दुहाते'' (अष्ट० ८ अ० ६ वर्ग २३) इत्यनया ऋचा परिहारः। दक्षिणवामहस्तौ कर्तृत्वे असमावित्यर्थः। अथाध्ययने ऋक्सङ्ख्योच्यते षण्णवत्यधिकचतुःदशसहस्राणीति (१०४९६)। ताः सहितनैमित्तिकद्विपदाश्चत्वारिंशोत्तरशतसहितदशसहस्राणीति 'सञ्ज्ञानमुशनावदत्' सूक्तस्य पञ्चदशर्चैकीकृत्य एवं पारायणे ऋक्सङ्ख्या। 'ऋचां दशसहस्राणि' इति वचनस्य सङ्ख्या पूर्णा भवतीत्यर्थः। एका उर्वरिता सा ''भद्रन्नोः अपि वातयमनः'' (अष्ट० ७ अ० ७ वर्ग २) इति पादाधिक्यमनुक्रमणिकावृत्तावप्युक्तेः। 'भद्रं पुच्छम्' (ऐत० आ० ५,८) इत्यारण्यके।

एकशतसहस्रं वा द्वित्रिपञ्चाशत्सहस्रार्द्धमेतानि चतुर्दशवासिष्ठानामितरेषां पञ्चाशीतिः क्रमकाले तु वेष्टव्यं चतुस्त्रिंशत्सहस्राणि तु द्विखण्डानां सहस्राणां द्वात्रिंशत् षोडशोत्तरा चत्वारिंशत्सहस्राणि द्वात्रिंशतश्चाक्षरसहस्राणि ।

ऋचां दशसहस्राणि ऋचां पञ्च शतानि च ।
ऋचामशीतिपादश्चैतत्पारायणमुच्यते ॥ १ ॥

एकर्च एकवर्गश्च एकश्च नवकस्तथा ।
द्वौ वर्गौ तु द्वृचौ ज्ञेयौ ऋक्त्रयश्च शतं स्मृतम् ॥ २ ॥

चतुर्ऋचां पञ्च सप्तमधिकं च शतं तथा ।
पञ्चर्चेश्च द्विशद्युक्तं सहस्रं रुद्रसंयुतम् ॥ ३ ॥

पञ्चचत्वार्यधिकं तु षड्ऋचां च शतत्रयम् ।
सप्तर्चस्य शतं ज्ञेयं विंशतिश्चाधिका स्मृता ॥ ४ ॥

अष्टऋचां तु पञ्चाशत्पञ्चाधिकं तथैव च ।
दशाधिकद्विसहस्र पञ्चशाखासु निश्चिता ॥ ५ ॥

वर्गाः संज्ञानसूक्तस्य चत्वारश्चात्र मीलिताः ।
एवं पारायणे प्रोक्ता ऋचा संख्येन न्यूनतः ॥ ६ ॥

अथ सञ्ज्ञानसूक्तम्—

सञ्ज्ञानमुशनाऽवदत्सञ्ज्ञानं वरुणोऽवदत्।
सञ्ज्ञानमिन्द्रश्चाग्निश्च सञ्ज्ञानं सविताऽवदत् ॥ १ ॥

सञ्ज्ञानं नश्वेभ्यः सञ्ज्ञानमरणेभ्यः।
सञ्ज्ञानमश्विना युवमिहास्मासु नियच्छताम् ॥ २ ॥

यत्कक्षीवांसं वननं पुत्रो अङ्गिरसा भवेत्।
तेन नोऽद्य विश्वदेवाः सम्प्रियां समजीजनन् ॥ ३ ॥

सं वो मनांसि जानताम् समाकूतिर्मनामसि।
असो यो विमना मनः संसमावर्तयामसि ॥ ४ ॥

नैर्हस्त्ययं सेनादरणं परिवर्त्मे तु यद्धविः।
तेनाऽमित्राणां बाहून्हविषा शोषयामसि ॥ ५ ॥

परिवर्त्मान्येषामिन्द्रः पूषा च सस्रतुः।
तेषां वोऽग्निदग्धानामग्निमूढ्डानामिन्द्रो हन्तु वरं वरम् ॥ ६ ॥

ऐषु नह्यवृषाजिनं हरिणस्य धियं यथा।
पराँऽमित्राँऽऐष त्वर्वाची गौरुपाजतु ॥ ७ ॥

प्राध्वराणां पते वसो होतर्वरेण्य क्रतो ।
तुभ्यं गायत्रमृच्यते ॥ ८ ॥

गोकामोऽन्नकामः प्रजाकाम उत कश्यपः ॥ ९ ॥

भूतं भविष्यत्प्रस्तौति सहब्रह्मैकमक्षरं वहु ब्रह्मैकमक्षरम् ॥ १० ॥

यदक्षरं भूतं कृतं विश्वेदेवा उपासते ।
महर्षिमस्य गोप्तारं जमदग्निरकुर्वतम् ॥ ११ ॥

जमदग्निराप्यायते छन्दोभिश्चतुरुत्तरैः ।
राजा सोमस्य भक्षेण ब्रह्मणा वीर्यावताम् ॥ १२ ॥

शिवा नः प्रदिशो दिशः सत्या नः प्रदिशो दिशः ।
अजो यत्तेजो ददृशे शुक्रं ज्योतिः परो गुहा ॥ १३ ॥

यदृषिः कश्यपः स्तौति सत्यं ब्रह्म चराचरं ध्रुवं ब्रह्मचराचरम् ।
त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषमगस्त्यस्य त्र्यायुषम् ॥ १४ ॥

यद्देवानां त्र्यायुषं तन्मेऽस्तु त्र्यायुषं सर्वमस्तु शतायुषं बलायुषम् ॥ १५ ॥

(तच्छंयोरावृणी महे गातुं यज्ञाय गातुं यज्ञपतये ।
दैवी स्वस्तिरस्तुनः स्वस्तिर्मानुषेभ्यः ।
ऊर्ध्वं जिगातु भेषजं शन्नो अस्तु द्विपदे शं चतुष्पदे ॥)

(अष्ट० ८ अ० ८ परिशिष्ट)

इति सञ्ज्ञानसूक्तं पञ्चदशर्चात्मकम् । अस्य ग्रहणे प्रमाणमाश्वलायनसूत्रम् । तच्च ''समानीव'' इत्येका ''तच्छंय्योरावृणीमह'' इत्येकेति । तथा च शाङ्खायनस्य कौषीतकिसूत्रम्— ''अथोपाकरण-मोषधीनां प्रादुर्भावे हस्तेन श्रवणेन वाऽक्षतसक्तूनां धानानां च दधिघृतमिश्राणां प्रत्यृचं वेदेन जुहुयादिति हैक आहुः सूक्तानुवाकाद्याभिरिति वाऽध्यर्षेयाद्याभिरिति माण्डूकेयोऽथ ह स्माह कौषीतकिरग्निमीडे पुरोहितमित्येका कुसुम्भकस्तदब्रवीदावदंस्त्वं शकुने भद्रमावद गृणाना जमदग्निना धामन्ते विश्वं भुवनमधिश्रितं गन्ता नो यज्ञं यज्ञियाः सुशमि यो न स्वोऽअरणः प्रतिचक्ष्वविचक्ष्वाग्ने याहि मरुत्सखा यत्ते राजं घृतं हविरिति द्व्यृचा तच्छंय्योरावृणीमह इत्येका हुतशेषाद्धविः प्राश्नन्ति'' (कौ० गृ० सू० ४.५) इति । पञ्च शाखानां पारायणे 'तच्छंय्योरावृणीमह' इत्यत्र समाप्तिरेकवेदत्वात् । उक्तं च—

ऋचां समूह ऋग्वेदस्तमभ्यस्य प्रयत्नतः ।
पठितः शाकलेनादौ चतुर्भिस्तदनन्तरम् ।।
साङ्ख्याश्वालायनौ चैव माण्डूका वाष्कला तथा ।
बह्वृचा ऋषयः सर्वे पञ्चैते ह्येकवेदिनः ।।

इति ।

साङ्ख्यानाम शाङ्खायन इति ।

अथ पारायणे वर्गसङ्ख्योच्यते— 'एकर्च एकवर्गश्च एकर्चनवकस्तथा' । एकर्च एकवर्गो 'जातवेदसे' (अष्ट० १ अ० ७ वर्ग ७) इत्यर्थः । नवर्च एकवर्गः 'आपो हि ष्ठा' (अष्ट० ७ अ० ५ वर्ग ५) इति । द्वौ वर्गौ तु द्वृचौ ज्ञेयौ द्वौ वर्गौ द्वृचावित्यर्थः । 'अग्ने त्वन्नोऽअन्तमः' (अष्ट० ४ अ० १ वर्ग १६), 'आयाहि वनसा सह' (अष्ट० ८ अ० ८ वर्ग ३०) इति । ऋक्त्रयस्य शतं स्मृतम् । तृचो वर्गाः शतमित्यर्थः । 'उत त्यं चमसं नवम्' (अष्ट० १ अ० २ वर्ग २) इत्यादि ।

चतुर्ऋचां पञ्चसप्तत्यधिकं च शतं तथा ॥

चतुर्ऋचवर्गाः पञ्चसप्तत्यधिकशतमित्यर्थः। 'यदङ्ग दाशुषे त्वम्' (अष्ट० १ अ० १ वर्ग २) इत्यादि।

पञ्चर्चे तु द्विशतकं सहस्रं रुद्रसंयुतम् ॥

पञ्चर्चवर्गा एकादशाधिकद्वादशशतानीत्यर्थः (१२११)। 'अग्निमीडे' इत्यादि।

पञ्चचत्वार्यधिकं तु षड्ऋचां तु शतत्रयम् ॥

षड्ऋचवर्गाः पञ्चचत्वारिंशदधिकशतत्रय इत्यर्थः (३४५)। 'अश्विना यज्वरीरिष' (अष्ट० १ अ० १ वर्ग ५) इत्यादि।

सप्त ऋचां शतं ज्ञेयं विंशतिश्चाधिकाः स्मृताः।

सप्तर्चवर्गा विंशत्यधिकशत इत्यर्थः। 'यच्चिद्धि सत्यसोमपा' (अष्ट० १ अ० २ वर्ग २७) इत्यादि।

अष्टऋचां तु पञ्चाशत्पञ्चाधिकास्तथैव च ॥

अष्टर्चवर्गाः पञ्चाधिकपञ्चशत इत्यर्थः (५०५)। 'इन्द्रं विश्वाऽअवीवृधन् (अष्ट० १ अ० १ वर्ग २१) इत्यादि। एवं दशाधिक सहस्रद्वयवर्गा इत्यर्थः (२०१०)। पञ्चशाखासु निश्चिताः। पञ्चशाखानां पारायणे निश्चयेन इत्यर्थः।

वर्गा सञ्ज्ञानसूक्तस्य चत्वारश्चात्र मीलिताः ॥

सञ्ज्ञानसूक्तस्य चत्वारो वर्गाश्चात्र मिलित्वा दशाधिकसहस्रद्वयमित्यर्थः।

एवं पारायणे प्रोक्ता ऋचां सङ्ख्येन न्यूनतः ॥

एवं पूर्वोक्तप्रकारेण वर्गस्य ऋक्न्यूनसङ्कचेन दशर्चस्य पञ्चऋक् त्रीण्यर्द्धर्चस्य कर्तव्येत्यर्थः । एवं चतुर्विधपारायणेऽपि ज्ञेयम् । 'समानीव' (अष्ट० ८ अ० ८ वर्ग ४९) इति शाकलानां 'तच्छँय्योरिति' वाष्कलानामित्यत्र वाष्कलशाखाध्ययनमनुक्रमणिकावृत्तावुक्तम् ।

तच्च—

गौतमादौशिजः कुत्सः पारुच्छेपादृषेः परः ।
कुत्सादीर्घतमेत्येवं वाष्कलाध्ययने क्रमः ॥

अस्यार्थः गौतमादौशिजः कुत्सः । 'उप प्रयन्तो' (अष्ट० १ अ० ५ वर्ग २१), 'नासत्याभ्याम्' (अष्ट० १ अ० ८ वर्ग ८), 'अग्निं होतारम्' (अष्ट० २ अ० १ वर्ग १२), 'इमं स्तोमम्' (अष्ट० २ अ० ७ वर्ग ६), 'वेदिषदे' (अष्ट० २ अ० २ वर्ग ५), एष वाष्कलक्रम इत्यर्थः । अत्रैवमुक्ते उत्तममण्डले नवके अनुक्रमविपर्यासः । तच्च— 'स्वादोरभक्षि' (अष्ट० ६ अ० ४ वर्ग ११), सूक्तान्ते 'अभिप्रवः सुराधसम्' (अष्ट० ६ अ० ४ वर्ग १४), 'प्र सुश्रुतम्' (अष्ट० ६ अ० ४ वर्ग १६) इति सूक्तद्वयं पठित्वा, 'अग्नऽआयाहि अग्निभिः' (अष्ट० ६ अ० ४ वर्ग ३२) इति पठेत् । ततः 'आप्र द्रव' (अष्ट० ६ अ० ६ वर्ग १) अध्याये 'गौर्धयति' (अष्ट० ६ अ० ६ वर्ग २८) अनुवाको दशसूक्तात्मकः शाकलस्य । पञ्चदशसूक्तात्मको वाष्कलस्य । तत्रोच्यते— 'गौर्धयति' सूक्तानन्तरं 'यथा मनौ सांवरणौ' (अष्ट० ६ अ० ४ वर्ग १८), 'यथा मनौ विवस्वति' (अष्ट० ६ अ० ४ वर्ग २०), 'उपमन्त्वा' (अष्ट० ६ अ० ४ वर्ग २२), 'एतत्तऽइन्द्र' (अष्ट० ६ अ० ४ वर्ग २४), 'भूरिदिन्द्रस्य' (अष्ट० ६ अ० ४ वर्ग २६) इत्यन्तानि पञ्चसूक्तानि पठित्वा आ त्वा गिरो रथीरिव (अष्ट० ६ अ० ६ वर्ग ३) इति पठेयुः । अन्ते—

'संसमित्' (अष्ट० ८ वर्ग ८ वर्ग ४९) सूक्तानन्तरं पञ्चदशऋचात्मकं 'सञ्ज्ञानमुशनावदत्' इत्यादि 'तच्छँय्योरावृणीमहे' इत्यन्तं वेदसमाप्तिरिति वाष्कलशाखाध्ययनम् । एवमध्ययनाभावाच्छाखाऽभाव इत्यर्थः। सूक्तसहस्रसप्तदशाधिकात् अष्टौ सूक्तानि वाष्कलस्याधिकानीत्यर्थः। 'प्रति ते (अष्ट० ६ अ० ४ वर्ग २७), 'युवं देवा' (अष्ट० ६ अ० ४ वर्ग २८), 'यमृत्विजो' (अष्ट० ६ अ० ४ वर्ग २९), 'इमानि वाम्' (अष्ट० ६ अ० ४ वर्ग ३०) इति चत्वारि वालखिल्यसूक्तानां लोप इत्यर्थः।

यस्तानृग्वेदचैवाप्यधीते स नाकपृष्ठं भजते ह शश्वत् ॥

अस्यार्थः यः तान् ऋगर्थवित् वेदविदितः हवने पारायणे च अधीते सः वेदिताऽध्येता च नाकपृष्ठं शश्वत् सदा भजते। ह प्रसिद्धौ। इतोऽमुं लोकमेत्युत तस्मान्न प्रच्यवते हीत्यर्थः।

अथ पारायणफलं तदुक्तमारण्यके—''यद्धि सन्धिं विवर्तयति तं निर्भुजस्य रूपमथ यच्छुद्धे अक्षरे अभिव्याहरति तत्प्रण्तृणस्य रूपमग्रऽउऽएवोभयमन्तरेणोभयव्याप्तं भवत्यन्नाद्यकामो निर्भुजं ब्रूयात्स्वर्गकामः प्रतृण्णमुभयकाम उभयमन्तरेणेति'' ।

अस्यार्थः द्वयोः पदयोरक्षरयोर्वाऽपि सन्धिस्तस्य अविच्छेदाध्ययनं तन्निर्भुजं संहितापारायणमुच्यते। शुद्धे द्वे पदे अक्षरे वा सन्धिमकुर्वतोच्चारणं तत्प्रतृण्णं तत्पदपारायणम् । संहितापदाभ्यामुभाभ्यां व्याप्तमुभयमन्तरेण क्रमपारायणमित्यर्थः । तथा च सति त्रिभिः कृत्वा स्वरास्वरं विजानाति मात्रामात्रां विभजन्ते सा संहितेति। एवमेतां संहितां यो वेद सन्धीयते प्रजया पशुभिर्यशसा ब्रह्मवर्चसेन स्वर्गेण लोकेन सर्वमायुरेतीति । तस्मात्क्रमादृते द्वे पदे संहिता द्वै पदस्वरश्च न सिध्यति । द्वै पदसिद्धे उत्तरारम्भः कर्तुं न शक्यते । अतश्च पादार्द्धर्चऋक् सूक्तसिद्ध्यर्थं भगवता पाञ्चालेन स्थापितानां पारायणकर्मणां क्रमपारायणमुत्तमं भवतीति च। अत्र श्लोकः—

प्रागाथेन पुरा दानं दृष्ट्वा क्रुद्धो महामुनिः ।
अर्थवन्तं क्रमं ब्रूयादेवतायाश्च शास्त्रतः ॥

अतो ऋग्यजुषां बृंहणं पदैः स्वरैश्चाध्ययनं तथा त्रिभिः ।

अतोऽपि अस्मादपि हेतोः क्रमः अर्थवान्भवति । क्रमेण कृत्वा ऋग्वेदपारायणे ऋचां बृंहणं साधारणं भवति । इदमित्थमेव पाठ इति स्वरमात्रादिरूपेण निश्चयो भवति । तथा यजुर्वेदपारायणे यजुषां बृंहणं नाम साधारणं स्वरमात्रादिरूपेण इदमित्थमेव पाठ इति निश्चयो भवति इत्यतिदेशः । इत्यलं प्रपञ्चेन ।

अथ पारायणविधिः । अत्रादौ कलशस्थापनाद्युक्तं महार्णवे—

तीर्थे देवालये गेहे प्रशस्ते सुपरिष्कृते ।
कलशं सुदृढं तत्र सुनिर्णिक्तं सुभूषितम् ॥ १ ॥

पुष्पपल्लवमालाभिश्चन्दनैः कुङ्कुमादिभिः ।
मृत्तिकायवसम्मिश्रं वेदमध्ये न्यसेत्ततः ॥ २ ॥

पञ्चाशद्भिः कुशैः कार्यो ब्रह्मा पश्चान्मुखस्थितः ।
स्नापितः स्थापितः कुम्भे चतुर्बाहुश्चतुर्मुखः ॥ ३ ॥

वत्सजान्वाकृतिं वेदमुत्तराग्रैः कुशैः कृतम् ।
ब्रह्मोपदाने दत्वा तं ततः स्वस्त्ययनं पठेत् ॥ ४ ॥

प्रतिष्ठां कारयेत्पश्चात्पूजाद्रव्यमथोच्यते ।
यज्ञोपवीतं नैवेद्यं वस्त्रचन्दनकुङ्कुमैः ॥ ५ ॥

स्रग्धूपदीपताम्बूलैरेतैश्चापि पितामहम् ।
ब्रह्मयज्ञानमिति वा गायत्र्या वा प्रपूजयेत् ॥ ६ ॥

उपाध्यायं च सम्पूज्य यथा पाठं पठेत्ततः ॥

ततो होमादि वक्ष्यमाणं कृत्वा पठेदित्यर्थः । तत्रैव बौधायनः—

''स्थण्डिलं कल्पयित्वाग्निमुपसमाधाय तं परिस्तीर्याज्येनैताभ्यो देवताभ्यो जुहोत्यग्नये सोमाय विश्वेभ्यो देवेभ्यो ब्रह्मणे ऋषिभ्यो ऋग्भ्यो यजुर्भ्यः सामभ्यः श्रद्धायै मेधायै प्रज्ञायै धारणायै श्रियै ह्रियै सावित्र्यै सवित्रे प्रजापतये काण्डऽऋषयेऽग्नये काण्डऽऋषये विश्वेभ्यो देवेभ्यः काण्डऽऋषिभ्यः संहिताभ्यो देवताभ्यऽउपनिषद्भयो याज्ञिकीभ्यो देवताभ्य उपनिषद्भ्यो वारुणी देवताभ्य उपनिषद्भ्यो हव्यवाहाय विश्वेभ्यो देवेभ्यो वरुणेभ्योऽनुमत्यै स्विष्टकृते च पृथक् स्वाहाकारेण हुत्वा व्याहुतिभिश्च हुत्वा पुनः परिषिञ्चति समाप्ते चैता यजुषा तर्पयति'' ।

अन्ते एता ''अग्निसोमाद्या'' यजुषा पदेन सह तर्पयेत् । यद्वा ''भूर्देवांस्तर्पयामि'' इत्यादि यजुषा तर्पयित्वाऽन्यादींस्तर्पयेदित्यर्थः ।

महार्णवे—

''एवमृग्वेदस्य काण्डऽऋष्यादिवर्जमास्विष्टकृतस्तेषां स्थाने शतर्चिभ्यो माध्यमेभ्यो गृत्समदाय विश्वामित्राय वामदेवायाऽत्रये भरद्वाजाय जमदग्नये गौतमाय वसिष्ठाय प्रागाथेभ्यः पावमानीभ्यः क्षुद्रसूक्तेभ्यो महानाम्नीभ्य इति।'' ''ततो वेदादिमारभ्य सन्ततमधीयीत'' इत्याह भगवान्बोधायनः।

पुनर्महार्णवे—

''अथातः पारायणविधिं व्याख्यास्याम आसमाप्तेर्नाश्नीयाद्यथाशक्तिं वाऽऽपः पयः फलान्योदनं वा हविष्यमात्रमन्नमल्पं भुक्त्वा तदाऽशेषमधीयीत ग्रामात्प्राच्यामुदीच्यां वा दिश्युपनिष्क्रम्याग्निमुपसमाधाय परिस्तीर्येध्मं प्रज्वाल्याज्येनैताभ्यो देवताभ्यो जुहोत्यग्नये सोमायेन्द्राय प्रजापतये बृहस्पतये विश्वेभ्यो देवेभ्यो ब्रह्मणे ऋषिभ्यऽऋग्यजुर्भ्यः सामभ्यः श्रद्धायै मेधायै प्रजायै धारणायै सदसस्पतयेऽनुमतये श्रियै ह्रियै सावित्र्यै सवित्रे प्रजापतये काण्डऽऋषये सोमाय काण्डऽऋषयेऽग्नये काण्डऽऋषये विष्वेभ्यो देवेभ्यः काण्डऽऋषिभ्यः सांहितीभ्यो देवताभ्यऽउपनिषद्भ्यो याज्ञिकीभ्यो देवताभ्यऽउपनिषद्भ्यो वारुणीभ्यो देवताभ्यऽउपनिषद्भ्यो हव्यवाहाय विश्वेभ्यो वरुणेभ्योऽनुमत्यै स्विष्टकृते च पृथक् स्वाहाकारेण हुत्वा व्याहृतिभिश्च तुनः परिषिञ्चति समाप्ते चैता यजुषा तर्पयतीति''।

अन्ते एता 'अग्निसोमाद्या' यजुषा पदेन सह तर्पयेत्।

यद्वा ''भूर्देवांस्तर्पयामि'' इत्यादि यजुषा तर्पयित्वाऽग्न्यादींस्तर्पयेदित्यर्थः।

महार्णवः—

''एवमृग्वेदिनां काण्डऽऋष्यादिवर्जमास्विष्टकृतस्तेषां 'शतर्चिभ्य' इत्यादि 'महानाम्नीभ्य' इत्यन्तं प्राग्वत्। ततो वेदादिमारभ्य सन्ततमधीयीत नास्यान्तराऽनध्यायो नास्यान्तरा जननमरणे अशुचिः। आशौचं नेत्यर्थः 'नान्तरा व्याहरेन्न विरमेद्यावन्तमधीयीत।' यावत्पर्यन्तं न विरमेन्नान्यच्च वदेदित्यर्थः। यदन्तरा विरमेत् त्रीन्प्राणानायम्य प्रणवं वा प्रविधाय यावत्कालमधीयीत। ततः सर्वनिशान्तरं सङ्ग्रामारण्यसलिलं लोप्य परिदध्यात्।' निशान्तरं सन्ध्यानिशादींल्लोप्य विहाय समापयेदित्यर्थः। आदावन्ते च ब्राह्मणभोजनं दक्षिणां च दद्यात्'' इति महार्णवोक्तं विधानम्।

अथ कमलाकरः—

''य एतेन विधिना वेदमधीयीत सन्ततः पूतो वेदो भवति' वेदरूपो भवतीत्यर्थः। 'द्वाभ्यां पारायणाभ्यां ऋग्भिश्चाऽभोजन इहाधीतेऽनृतेभ्यः प्रमुच्यते। त्रिभिर्बहुभ्यः पतनीयपातकेभ्यः शूद्रायां रेतः सिक्त्वा गङ्गाऽप्सुवन्निमज्यश्च भवति। चतुर्भ्यः शूद्रान्नभोजनात्स्त्रीसेवनाच्च, पञ्चभिरयाज्ययाजना-दग्राह्यग्रहणात्, षड्भिर्ब्राह्मणस्य लोहितकरणात्स्त्रीलोहितकरणात्पशुहननात्सुवर्णस्तेयात्पतितसंयोगाच्च, सप्तभिः प्राजापत्यस्य हीनचरणाद्यज्ञोपबन्धनाच्चाष्टभिश्चान्द्रायणस्यान्तराऽऽचरणाद् गुरुतल्पगमना-द्रजस्वलागमनाच्च, नवभिः सुरापानाद्दशभिः पूर्वजन्मेहजन्मकृतैः सर्वैः पापैः प्रमुचते स्वर्गल्लोकं गच्छति इति। अग्निष्टोमादिक्रतुभिरिष्टं भवति, पितॄन्स्वर्गल्लोकं गमयति।

वेदाध्यायी सदैव स्यादपाप्मा सत्यवाक् शुचिः।
यं यं कामं कामयये तं तं वेदेन साधयेत्॥
असाध्यं नास्ति यत्किञ्चिद् ब्रह्मणो हि फलं महत्।''

ऋग्विधाने—

आदावेव तु सावित्र्या कर्म कुर्वीत शान्तये।
पुष्ट्ये पशुलाभाय धनलाभाय भूतये ॥

एषा हि संहिता देवैः सर्वब्रह्ममयी निचृत्।
उग्रेण तपसा दृष्टा विश्वामित्रेण धीमता ॥

होमांश्च जपयज्ञांश्च नित्यं कुर्वीत वै तथा।
सर्वकामप्रसिद्ध्यर्थं परं ब्रह्मेदमुच्यते ॥

एषा वै प्रतिलोमोक्ता शत्रुपक्षविनाशिनी।
अक्षरप्रतिलोमेयमभिचारेषु शस्यते ॥

सर्वसंहितया प्रत्यृचं होम आज्येन तिलेन वा।

''आज्यं द्रव्यमनादेशे जुहोतिषु विधीयते।'' इति ब्राह्मोक्तेः। ''सर्वपापहरो होमस्तिलैः सर्वत्र शस्यते ॥'' इति विष्णुधर्मोत्तराच्च।

शातातपः—

कृच्छ्रो देव्ययुतं चैवं वेदपारायणं तथा।
तिलहोमसहस्रं च सममेतच्चतुष्टयम् ॥

इदं केवलम् । अन्त्ये चान्द्रमसम् ।

इति कमलाकरभट्टकृतो वेदपारायणविधिः समाप्तः ॥ ११ ॥

व्याख्या चरणव्यूहस्य आद्यखण्डस्य तेन वै ।
यथामति विरचिता महादेवप्रसादतः ॥

॥ इति चरणव्यूहे प्रथमखण्डव्याख्यासमाप्ता ॥

★ ★ ★ ★ ★

CHAPTER TWO

(concerning Yajurveda)

द्वितीयः यजुर्वेदखण्डः

यजुर्वेदस्य षडशीतिर्भेदा भवन्ति। तत्र चरका नाम द्वादश भेदा भवन्ति। चरका आह्वरकाः कठाः प्राच्यकठाः कपिष्ठलकठाश्चारायणीया वारायणीया वार्त्तान्तवेया श्वेताश्वतरा औपमन्यवः पाताण्डनीया मैत्रायणीयाश्चेति। तत्र मैत्रायणीया नाम षड्भेदा भवन्ति। मानवा वाराहा दुन्दुभाश्छागलेया हारिद्रवेया श्यामायनीयाश्चेति। तेषाध्ययनम्।

द्वे सहस्रे शते न्यूने मन्त्रे वाजसनेयके।
ऋग्गणं परिसङ्ख्यातं ततोऽन्यानि यजूंषि च॥

अष्टौ शतानि सहस्राणि चाष्टाविंशतिरन्यान्यधिकश्च पादमेतत्प्रमाणं यजुषां हि केवलं सवालखिल्यं सशुक्रियं ब्राह्मणं च चतुर्गुणम्। तत्र तैत्तिरीयका नाम द्विभेदा भवन्त्यौखेयाः खाण्डिकेयाश्चेति। तत्र खाण्डिकेया नाम पञ्चभेदा भवन्ति— कालेता शाट्यायनी हैरण्यकेशी भारद्वाज्यापस्तम्बी चेति। तेषामध्ययनम्। अष्टादशयजुःसहस्राण्यधीत्य शाखापारो भवति, तान्येव द्विगुणान्यधीत्य पदपारो भवति, तान्येव त्रिगुणान्यधीत्य क्रमपारो भवति, षडङ्गान्यधीत्य षडङ्गविद् भवति।

त्रिगुणं पठ्यते यत्र मन्त्रब्राह्मणयोः सह।
यजुर्वेदः स विज्ञेयः शेषाः शाखान्तराः स्मृताः॥

शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति षडङ्गानि ।

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते ।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ॥

शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् ।
तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते ॥

तथा प्रतिपदमनुपदं छन्दो भाषा धर्मो मीमांसान्यायस्तर्क इत्युपाङ्गानि । तत्र परिशिष्टानि भवन्ति, यूपलक्षणं छागलक्षणं प्रतिज्ञाऽनुवाकसङ्ख्याचरणव्यूहश्राद्धकल्पशुल्वकानि पार्षदमृग्यजूंषीष्टकापूरणं प्रवराध्यायोक्थशास्त्रक्रतुसङ्ख्या निगमा यज्ञपार्श्वहौत्रकं प्रसवोत्थानं कूर्मलक्षणमित्यष्टादश परिशिष्टानि भवन्ति । तत्र कठानां योगा येन विशेषस्तत्र प्राच्योदीच्यनैर्ऋत्यवाजसनेया नाम पञ्चदशभेदा भवन्ति— जावाला बौद्धायनाः काण्वा माध्यन्दिनेयाः शाफेयास्तापनीयाः कपोलाः पौण्डरवत्सा आवटिकाः परमावटिकाः पाराशराः वैणेया वैधेया अद्धा बौधेयाश्चेति । तेषामध्ययनं सौक्तिकं प्रवचनीयाश्चेति ।

मन्त्रब्राह्मणकल्पानामाङ्गानां यजुषामृचाम् ।
षण्णां यः प्रविभागज्ञः सोऽध्वर्युः कृत्स्नमुच्यते ॥ १ ॥

अथ द्वितीयखण्डो व्याख्यायते—

यजुर्वेदस्य षडशीतिर्भेदा भवन्ति । अत्र शाखाभेदो ग्राह्यः । षट् अशीतिर्भेदा इत्यर्थः । तत्र चरकानां द्वादशभेदा भवन्ति इति स्पष्टार्थः । ते के भेदाः ? चरकाः आह्वरकाः कठाः प्राच्यकठाः कपिष्ठलकठाः

आरायणीया वारायणीया वार्तान्तिवेया श्वेताश्वतरा औपमन्यवः पाताण्डनीया मैत्रायणीयाश्चेति । मैत्रायणीयानां षड्भेदा भवन्ति । मानवा दुन्दुभा वाराहका छागलेया हारिद्रवेया श्यामायनीयाश्चेति । इति षट् मैत्रायणीयशाखागणा इत्यर्थः । मैत्रायणीयानां केचित्सप्तभेदा भवन्ति इति वदन्ति, श्यामा इत्यधिकं तदधिकमेव । मैत्रायणीयस्तु वाजसनेयवेदाध्यायी । मानवं कल्पसूत्रम् । तेषामध्ययनमष्टोत्तरशतं यजुः सहस्राण्यधीत्य शाखापारो भवति । तेषामध्ययने द्विचत्वारिंशदध्यायाः । अष्टशताधिकसहस्रमन्त्रा इत्यर्थः । तान्येव द्विगुणान्यधीत्य पदपारो भवति द्विवारपठनात्पदपारायणफलं भवतीत्यर्थः । तान्येव त्रिगुणान्यधीत्य क्रमपारो भवति त्रिवारपठनात्क्रमपारायणफलं भवतीत्यर्थः । पदक्रमाध्ययनं भवतीत्यर्थः ।

'षडङ्गान्यधीत्य षडङ्गविद्भवति' तानि कानि षडङ्गानि ? उच्यन्ते । शिक्षादीनि षडङ्गानि भवन्ति । षडुपाङ्गान्यपि प्रतिपदादितर्कान्तानि भवन्ति । तस्मिन्यजुर्वेदे यूपलक्षणादिकूर्मलक्षणान्तान्यष्टादश परिशिष्टसूत्राणि भवन्ति । एतेषां व्याख्यानान्यग्रे वक्ष्यामः । तत्र प्राच्योदीच्यां नैर्ऋत्यां निर्ऋत्यस्तत्र वाजसनेयानां पञ्चदशभेदा भवन्ति प्राच्य उदीच्य नैर्ऋत्येषु तिसृषु दिक्षु वाजसनेयवेदोत्पत्तिरग्रे वक्ष्यामः । इतरदेशेषु वेदशाखयोर्विभाग उच्यते । तच्च महार्णवे—

पृथिव्या मध्यरेखा च नर्मदा परिकीर्तिता ।
दक्षिणयोत्तरयोर्भागे शाखा वेदाश्च उच्यते ॥ १ ॥

नर्मदादक्षिणे भागे आपस्तम्ब्याश्वलायनी ।
राणायनी पिप्पला च यज्ञकन्याविभागिनः ॥ २ ॥

माध्यन्दिनी शाङ्खायनी कौथुमी शौनकी तथा ।
नर्मदोत्तरभागे च यज्ञकन्याविभागिनः ॥ ३ ॥

तुङ्गा कृष्णा तथा गोदा सह्याद्रिशिखरावधि।
आ आन्ध्रदेशपर्यन्त बह्वृचश्चाश्वलायनी ॥ ४ ॥

उत्तरे गुर्जरे देशे वेदो बह्वृच ईरितः।
कौषीतकीब्राह्मणं च शाखा शाङ्खायनी स्थिता ॥ ५ ॥

आन्ध्रादि दक्षिणाग्नेयी गोदा सागरआवधि।
यजुर्वेदस्तु तैत्तिर्य आपस्तम्बी प्रतिष्ठिता ॥ ६ ॥

सह्याद्रिपर्वतारम्भाद्दिशां नैर्ऋत्यसागरात्।
हिरण्यकेशी शाखा च पर्शुरामस्य सन्निधौ ॥ ७ ॥

मयूरपर्वताच्चैव यावद्गुर्जरदेशतः।
व्याप्ता वायव्यदेशात्तु मैत्रायणी प्रतिष्ठिता ॥ ८ ॥

अङ्गवङ्गकलिङ्गश्च कानीनो गुर्जरस्तथा।
वाजसनेयी शाखा च माध्यन्दिनी प्रतिष्ठिता ॥ ९ ॥

ऋषिणा याज्ञवल्क्येन सर्वदेशेषु विस्तृता।
वाजसनेयवेदस्य प्रथमा काण्वसञ्ज्ञका ॥ १० ॥

इति।

व्यासशिष्यो वैशम्पायनो निगदाख्यं यजुर्वेदं पठित्वा शिष्यांश्चकार। तच्च भागवते—

वैशम्पायनशिष्या वै चरकाध्वर्यवोऽभवन् ।
यच्चेरुर्ब्रह्महत्यांहः क्षपणं स्वगुरोर्व्रतम् ॥ १ ॥

याज्ञवल्क्यश्च तच्छिष्य आहांहो भगवन्कियत् ।
चरितेनाल्पसाराणां चरिष्येऽहं सुदुश्चरम् ॥ २ ॥

इत्युक्तो गुरुरप्याह कुपितो याह्यलं त्वया ।
विप्रावमन्त्रा शिष्येण मदधीतं त्यजाश्विति ॥ ३ ॥

देवरातसुतः सोऽपि च्छर्दित्वा यजुषां गणम् ।
ततो गतोऽथ मुनयो ददृशुस्तान्यजुर्गणान् ॥ ४ ॥

यजूंषि तित्तिरा भूत्वा तल्लोलुपतयाऽऽददुः ।
तैत्तिरीया इति यजुः शाखा आसन्सुपेशलाः ॥ ५ ॥

याज्ञवल्क्यस्ततो ब्रह्मन् छन्दांस्यधिगवेषयत् ।
गुरोरविद्यमानानि सूपतस्थेऽर्कमीश्वरम् ॥ ६ ॥

याज्ञवल्क्य उवाच— 'ओं नमो भगवते आदित्याय' इत्यारभ्य 'यातयामयजुः काम उपसरामि' इत्यन्तं तुष्टाव ।

सूत उवाच—

एवं स्तुतः स भगवान्वाजिरूपधरो हरिः ।
यजूँष्ययातयामानि मुनयेऽदात्प्रसादितः ॥ ७ ॥

यजुर्भिरकरोच्छाखा दश पञ्चशतैर्विभुः ।
जगृहुर्वाजसन्यस्ता काण्वमाध्यन्दिनादयः ॥ ८ ॥

इत्यादि ग्रन्थपर्यालोचनया यजुर्वेदत्यागानन्तरं देवरातसुतेन अब्राह्मणत्वभिया सविता सूर्यो वाजिरूपेण वाजेभ्यः केसरेभ्यः वाजेन वेगेन वा सन्यस्तास्त्यक्ताः शाखा वाजसनेयी संज्ञा । शाखारण्डत्वपरिहारार्थं चातुर्वेद्यत्वसङ्ख्यासंरक्षणार्थं च वाजिरूपेण सूर्येणायातयामानि यजूंषि मुनये वृत्तानि तैर्यजुर्भिरुपरतैः स मुनिस्ताः वाजसन्यः पञ्चदशशाखा अकरोत् । तस्माच्च मुनेः सकाशात्काण्वा माध्यन्दिनादय अध्ययनं चक्रुः । ते पञ्चदश भवन्ति । अथ प्रसङ्गाद्यजुर्वेदस्य शाखाप्रणयनविचारः किञ्चिदुच्यते । तत्र यजुर्वेद एव प्रथमः ।

तथा च विष्णुपुराणे—

एक एव यजुर्वेदस्तं चतुर्द्धा व्यकल्पयत् । इति ।

यजुर्वेदो यज्ञोपयोगित्वरूपयोगात्सर्वोऽपि वेदो यजुर्वेद इत्युच्यते । यजुर्वेदस्य शाखाभेदं सविस्तरमाह—

यजुर्वेदतरो शाखाः सप्तविंशन्महामुने ।
वैशम्पायननामासौ व्यासशिष्यश्चकार वै ॥ १ ॥

शिष्येभ्यः प्रददौ ताश्च जगृहुस्तेऽप्यनुक्रमात् ।
याज्ञवल्क्यस्तु तस्याभूद्ब्रह्मरातसुतो द्विजः ॥ २ ॥

शिष्यः परमधर्मज्ञो गुरुवृत्तिरतः सदा ।
ऋषिर्योऽद्य महामेरोः समाजे नागमिष्यति ॥ ३ ॥

तस्य वै सप्तरात्रात्तु ब्रह्महत्या भविष्यति ।
पूर्वमेवं मुनिगणैः समयो यः कृतो द्विज ॥ ४ ॥

वैशम्पायन एकस्तु तं व्यतिक्रान्तवांस्तदा ।
स्वस्रीयं बालकं सोऽथ पदधृष्टमधातयत् ॥ ५ ॥

शिष्यानाह स भोः शिष्या ब्रह्महत्यापहं व्रतम् ।
चरध्वं मत्कृते सर्वे न विचार्यमिदं तथा ॥ ६ ॥

अथाह याज्ञवल्क्यस्तु किमेतैर्बहुभिर्द्विजैः ।
क्लेशितैरल्पतेजोभिश्चरिष्येऽहमिदं व्रतम् ॥ ७ ॥

ततः क्रुद्धो गुरुः प्राह याज्ञवल्क्यं महामुनिम् ।
मुच्यतां यत्त्वयाधीतं मत्तो विप्रावमानक ॥ ८ ॥

निस्तेजसो वदसि येनान्यत्त्वं ब्राह्मणपुङ्गवान् ।
तेन शिष्येण नार्थोऽस्ति ममाज्ञाभङ्गकारिणा ॥ ९ ॥

याज्ञवल्क्यस्ततः प्राह भक्त्यैतत्ते मयोदितम् ।
ममाप्यलं त्वयाधीतं यन्मया तदिदं द्विज ॥ १० ॥

श्री पराशर उवाच—

इत्युक्तो रुधिराक्तानि सरूपाणि यजूँषि सः।
छर्दयित्वा ददौ तस्मै ययौ च स्वेच्छया मुनिः ॥ ११ ॥

यजूँष्यथ विसृष्टानि याज्ञवल्क्येन वै द्विज।
जगृहुस्तित्तिरा भूत्वा तैत्तिर्यास्तु ततः स्मृताः ॥ १२ ॥

ब्रह्महत्याव्रतं चीर्णं गुरुणा चोदितैस्तुतै।
चक्रुराध्वर्यवं[1] ते तु चरणान्मुनिसत्तम ॥ १३ ॥

याज्ञवल्क्योऽपि मैत्रेय प्राणायामपरायणः।
तुष्टाव प्रयतः सूर्यं यजूँष्यभिलषंस्ततः ॥ १४ ॥

अस्यार्थः 'यजुर्वेतरोः' इत्यादिना सप्तविंशतिः। इयं च प्रधानशाखानां सङ्ख्या। ब्रह्माण्ड-पुराणोक्तषडशीति शाखाभेदस्तु प्रतिशाखाविवक्षया ताश्च शुक्लयजुः पञ्चदशकं सहेत्येकशाखा आपस्तम्बोक्ता इति द्रष्टव्यम्। याज्ञवल्क्येन छर्द्रितैर्यजुर्भिस्तैत्तिरीयशाखा बभूव। ते याज्ञवल्क्यव्यतिरिक्ता वैशम्पायनशिष्या याज्ञवल्क्येन छर्दितं विप्ररूपेण ग्रहीतुमनुचितमिति तित्तिरपक्षिणो भूत्वा याज्ञवल्क्यविसृष्टानि यजूँषि जगृहुः। ततस्ताः शाखास्तैत्तिरीया बभूवुरित्यर्थः। याज्ञवल्क्यव्यतिरिक्तानां 'चरकाध्वर्यु' सञ्ज्ञां निर्वक्ति—

चरकाध्वर्यवस्ते वै चरणान्मुनिसत्तम।

---

१. चरकाध्वर्यवः, वरकाध्वर्यवः

'वरकाध्वर्यव' इति पाठे वरणाद्यजुषां ग्रहणात्। आध्वर्यवं चक्रुरित्यर्थः। यजुषि वैशम्पायनेनाधीतानि।

याज्ञवल्क्यस्ततो ब्रह्मञ्छन्दांस्यधिगवेषयम्।
गुरोरविद्यमानानि सूपतस्थेऽर्कमीश्वरम्॥

इति भागवतोक्तेः।

याज्ञवल्क्य उवाच—

नमः सवित्रे द्वाराय मुक्तेरमिततेजसे।
ऋग्यजुः सामरूपाय त्रयीधामात्मने नमः ॥ १५ ॥

इत्यादि 'पराशर उवाच' इत्यन्ता स्तुतिं कृत्वा—

इत्येवमादिभिस्तेन स्तूयमानः स वै रविः।
वाजीरूपधरः प्राह व्रियतामभिवाञ्छितम् ॥ १६ ॥

याज्ञवल्क्यस्तदा प्राह प्रणिपत्य दिवाकरम्।
यजूँषि तानि मे देहि यानि सन्ति न मे गुरौ ॥ १७ ॥

पराशर उवाच—

एवमुक्तो ददौ तस्मै यजूँषि भगवान् रविः।
अयातयामसञ्ज्ञानि यानि वेत्ति न तद्गुरुः ॥ १८ ॥

यजूँषि यैरधीतानि तानि विप्रैर्द्विजोत्तम।
वाजिनस्ते समाख्याताः सूर्याश्वः सोऽभवद्यतः ॥ १९ ॥

शाखाभेदास्तु तेषां वै दश पञ्च च वाजिनाम्।
काण्वाद्यास्तु महाभागा याज्ञवल्क्यप्रवर्तिताः ॥ २० ॥ इति।

तद्गुरुवैशम्पायनो यानि न वेत्ति तेषां व्यासेनानुपदिष्टत्वादिति भावः। वाजिनः समाख्याता वाजिरूपसूर्यप्रोक्तसंहिताध्यायित्वात्।

अग्निपुराणेऽपि—

काण्वामाध्यन्दिनीसञ्ज्ञा कठी माध्यकठी तथा।
मैत्रायणी सञ्ज्ञा च तैत्तिरीयाभिधानका॥
वैशम्पायनिकेत्याद्याः शाखा याजुषसञ्ज्ञिता॥

इति। आदिशब्देन एतदन्यशाखाग्रहणम्। तदुक्तं नृसिंहपराशरे—

प्रथमो याज्ञवल्क्यश्च आपस्तम्बो द्वितीयकः।
तृतीयो मूलघटकश्चतुर्थो वाणसः स्मृतः ॥ १ ॥

पञ्चमो सहवासश्च षष्ठः स्याद्गोत्रपण्डितः।
रामानुजः सप्तमोक्त अष्टमश्च गयावलः ॥ २ ॥

त्रिदण्डो नवमः प्रोक्तो नवशाखाः प्रकीर्तिताः ।
तन्मध्ये सहवासस्तु कर्मनिष्ठो द्विजाग्रणीः ॥ ३ ॥

एवं शाखादेशभेदाद्बहवस्तु द्विजातयः ।
तत्रापि कर्मनिष्ठाश्च ग्राह्या यज्ञादिकर्मसु ॥ ४ ॥

हीना द्विजातयः सर्वे त्याज्याः सर्वत्र कर्मसु ।

हीनाः द्विजातयः अभीरादयः । परदेशे त्रिदण्डवेषधारिणः सन्यासिनः स्वग्रामे परिग्रहयुक्तास्ते त्रिदण्डिनः गोत्रपण्डितो वैश्यजातकः । मूलघटको नागबल्लीरोपकः । निर्गूला इति प्रसिद्धाः । अन्ये वाणसादि प्रसिद्धाः । केचिद् धर्मशास्त्रानभिज्ञा वानप्रस्थाज्जाता 'वाणसा' इति वदन्ति । तद्वाक्यमारूढपतितपरम् । तदुक्तं कूर्मपुराणे वानप्रस्थाश्रमधर्मे—

यस्तु पत्न्या वनं गत्वा मैथुनं कामतश्चरेत् ।
तद्व्रतं तस्य लुप्येत प्रायश्चित्तीयते द्विजः ॥

तत्र यो जायते गर्भो न संस्पृश्यो द्विजातिभिः ।
न हि वेदेऽधिकारोऽस्य तद्वंशेऽप्येवमेव हि ॥

आरूढपतितः प्रोक्तो मुनिभिस्तत्वदर्शिभिः ॥

इति । वाजसनीयवेदोत्पत्तिरित्यर्थः । जाबालाः बौधायनाः काण्वाः माध्यन्दिनेयाः शाफेयाः तापनीयाः कपोलाः पौण्डरवत्साः आवटिकाः परमावटिकाः पाराशराः वैणेयाः वैधेयाः अद्धाः बौधेयाः इति

पञ्चदशशाखा इत्यर्थः । 'प्रतिपदमनुपदम्' प्रतिपदे अनुपदं अल्पपदं कर्तव्यमित्यर्थः । 'छन्दः' छन्दोरत्नाकरादि 'भाषा' शब्द परिभाषा । 'धर्मः' धर्मशास्त्रमिताक्षरादि । 'मीमांसा' प्रसिद्धा । (जैमिनिमहर्षिकृतमध्यायद्वादशकम्) । 'न्यायस्तर्कः' न्यायशब्देन काणादसूत्रम् । तर्कशब्देन गौतमसूत्रम् । एति षडुपाङ्गानि । उपज्योतिषं ज्योतिःशास्त्रम् । साङ्गलक्षणं सामुद्रिकादि । यूपलक्षणं छागलक्षणं च यज्ञे प्रसिद्धम् । प्रतिज्ञासूत्रं खण्डत्रयात्मकम् । अनुवाकाध्यायः । वेदशाखापरिज्ञानार्थं चरणव्यूहसूत्रम् । श्राद्धसूत्रं नवखण्डात्मकम् । श्रौतयज्ञार्थमण्डपरचनात्मकं शुल्बसूत्रम् । पार्षदपरिशिष्टसूत्रम् । ऋग्यजुर्निर्णयात्मकं ऋग्यजुःपरिशिष्टसूत्रम् । इष्टकापूरणपरिशिष्टसूत्रम् । गोत्रप्रवरनिर्णयार्थः प्रवराध्यायः । उक्थ्यशास्त्रपरिशिष्टम् । ऋतुसङ्ख्या । निगम यज्ञपार्श्व हौत्रक प्रसवोत्थान कूर्मलक्षणपरिशिष्टपञ्चकं यज्ञेषु प्रयोजनं प्रसिद्धम् । एतानि परिशिष्टान्यष्टादशसङ्ख्यकानि कात्यायनमहर्षिप्रणीतानि ।

द्वे सहस्रे शते न्यूने मन्त्रे वाजसनेयके ।
ऋग्गणः परिसङ्ख्यातमेतत्सर्वं सशुक्रियम् ॥

वाजसनेयके वेदे नवशताधिकसहस्रमन्त्रा इत्यर्थः । एतत्सकलं सशुक्रियमण्त्रं 'ऋचं वाचम्' इति षट्त्रिंशदध्यायोक्तचतुर्विंशदृचात्मकसहितं मध्याह्ने शुक्लवर्णेन सूर्येण दत्तः सशुक्रयज्ञः परिसङ्ख्यात इत्यर्थः । वेदोपक्रमे चतुर्दशीयुक्तपौर्णिमाग्रहणाच्छुक्लयजुः । प्रतिपदायुक्तपौर्णिमाग्रहणात्कृष्णयजुरिति वा । ऋक्सङ्ख्या पञ्चविंशत्युत्तरैकोनविंशतिः (१९२५) । खिलमन्त्राः 'अग्निश्च' इति षड्विंशत्यध्यायोक्ताः । यजुःसङ्ख्या अष्टाविंशत्युत्तराष्टशतान्यष्टौ सहस्राणि । 'ब्राह्मणं च चतुर्गुणम्' वेदचतुर्गुणं शतपथब्राह्मणमित्यर्थः ।

यजुर्वेद तरोरासन् शाखा एकोत्तरं शतम् ।
तत्रापि च शिवाः शाखा दश पञ्च च वाजिनाम् ॥

तत्रापि मुख्या विज्ञेया शाखा या कण्वसञ्ज्ञका। इति ग्रन्थान्तरे।

तत्र तैत्तिरीयका नाम द्विभेदा भवन्ति औखेयाः खाण्डिकेयाश्चेति। तत्र खण्डिकेया नाम पञ्चभेदा भवन्ति— कालेता शाट्यायनी हैरण्यकेशी भारद्वाज्यापस्तम्बी चेति॥ २॥

तेषामध्ययनम्। अष्टादशयजुःसहस्राण्यधीत्य शाखापरो भवति, तान्येव त्रिगुणान्यधीत्य तदपारो भवति। षडङ्गानधीत्य षडङ्गविद् भवति॥ ३॥

तैत्तिरीयकानां द्विभेदा भवन्ति— औखेया खाण्डिकेयाश्चेति। खाण्डिकेयानां पञ्चभेदा भवन्ति— कालेता शाट्यायनी हिरण्यकेशी भारद्वाजी आपस्तम्बीति। तेषामध्ययनपरिमाणम्—

काण्डास्तु सप्त विज्ञेयाः प्रश्नाश्चाधिक्यकाश्चतुः।
चत्त्वारिंशत्तु विज्ञेया अनुवाकाः शतानि षट् ॥ १॥

एकपञ्चाशदधिकाः सङ्ख्याः पञ्चाशदुच्यते।
द्विसहस्रश्चैकशतमष्टानवति चाधिका ॥ २॥

लक्षैकं तु द्विनवति सहस्राणि प्रकीर्तितम्।
पदानि नवतिश्चैव तथैवाक्षरमुच्यते ॥ ३॥

लक्षद्वयं त्रिपञ्चाशत्सहस्राणि शताष्टकम्।
अष्टषष्ट्यधिकं चैव यजुर्वेदप्रमाणकम् ॥ ४॥

काण्डाः ७ । प्रश्नाः ४४ । अनुवाकाः ६५१ । सङ्ख्याः २१९८ । पदानि १९२०९० । अक्षराणि २५३८६८ ।

शाखावाक्यान्ययुतानि सहस्राणि नवानि च ।
चतुःशतान्यशीतिश्च अष्टौ वाक्यानि गण्यते ॥

इति ब्राह्मणे अष्टौ वाक्यसङ्ख्या १९४८० । इति तैत्तिरीयनिगदवेदाख्यसङ्ख्योक्ता इत्यर्थः तत्र कठानां तूपगायतुचतुश्चत्वारिंशदुपग्रन्थाः ।

मन्त्रब्राह्मणयोर्वेदस्त्रिगुणं यत्र पठचते ।
यजुर्वेदः स विज्ञेय अन्ये शाखान्तराः स्मृताः ॥

चतुश्चत्वारिंशदुपग्रन्थाः अध्यायाः समीपे उक्ताश्चत्वारिंशत् । मन्त्रश्च ब्राह्मणं च मन्त्रब्राह्मणे तयोर्मन्त्रब्राह्मणयोः तयोश्च वेद इति सञ्ज्ञा । तदुक्तं 'मन्त्रब्राह्मणयोर्वेद इति नामधेयम्' इत्यृक्शाखीय प्रातिशाख्यभाष्यकारेणोव्वटेन आपस्तम्बसामान्यसूत्रभाष्यकारेण कपर्दिना धूर्तस्वामिना च । तथा च सति मन्त्रो नाम संहितामन्त्रास्तादृङ्मन्त्ररूपसंहितायास्तन्मध्ये एव तदग्रे बाह्मणत्वेन पठनमित्युभयथाऽपि संहितात्वेन पदत्वेन क्रमत्वेन च पठनं त्रिगुणं पठनमिति 'स मन्त्रब्राह्मणयोर्वेदस्त्रिगुणं यत्र पठ्यते' इत्यर्थः । एतादृशपठनं शाखाया अध्ययनं स यजुर्वेदस्तच्च तैत्तिरीयशाखायामेवास्ति । तथा हि सम्पश्यामि— ''प्रजाऽअहमिह प्रजासो मानवीः'' इति संहितामन्त्रः । एतस्यैव ब्राह्मणं संहितायामेव तदग्रे एव सम्पश्यामि— ''प्रजाऽअहमित्याह यावन्त एवेति'' ब्राह्मणमित्युभयोरपि संहितात्वेन क्रमत्वेन पठनं त्रिगुणितं पठनं भवति । एतादृशमुदाहरणान्तरमाह— ''इमामगृभ्णन्रशनामृतस्य पूर्वऽआयुषिविदथेषु''

इति संहितामन्त्रः । एतस्यैव ब्राह्मणं संहितायामेव तदग्रे एव संहितारूपेण वर्तते । तत्कथम् ? इत्यपेक्षयामाह—''इमामगृभ्णन्नशनामृतस्येत्यश्वाभिधानीमादत्त'' इति ब्राह्मणम् । अनयोरपि त्रिगुणत्वेन पठनम् । ''उदात्तश्चानुदात्तश्च स्वरितश्च स्वरास्त्रय'' इति त्रिगुणत्वेन पठनं भवति । एते त्रिगुणाः कस्यापि शाखायां न भवन्ति किन्तु शाखा सङ्ग्रन्थत्वात् । एवमन्यान्यपि बहूनि वाक्यानि सन्ति तानि विस्तरभयान्नोक्तानि । अतः कारणात् अन्ये शाखान्तराः स्मृताः । तेषामध्ययनं प्रवचनीयाश्चेति' एतेषां शुक्लकृष्णयजुषां पठनं प्रवचनीयाः प्रतिवचनत्वेन आर्षीयपाठत्वेन च समाप्तमित्यर्थः ।

त्रिगुणं पठ्यते यत्र मन्त्रब्राह्मणयोः सह ।
यजुर्वेदः स विज्ञेयः शेषाः शाखान्तराः स्मृताः ॥ ४ ॥

अन्यान्यमपि पुराणवाक्यानि सङ्गृहीतानि—

अग्निमीले नमस्तुभ्यमिषे त्वोर्ज्जे लसत्तनुः ।
अग्नऽआयाहिवीतये शन्नोदेवी स्वरूपवान् ॥ १ ॥

इमे त्वोर्ज्जे यजुर्वेदशब्दः पुरुष एव च ।
नभश्च पूर्णिमासूर्य उदयव्यापिनी तथा ॥ २ ॥

सङ्गृह्यमाणश्च यो वेदं प्रतिवर्षे व्रतं चरेत् ।
यातयामनिवृत्त्यर्थं छन्दस्य च विशेषतः ॥ ३ ॥

तस्योष्णिक्छन्दलोमेषु गायत्री च त्वचा स्मृता ।
मांसेषु त्रिष्टुभं विद्यादनुष्टुब्रुधिरः स्मृतः ॥ ४ ॥

अस्थीषु जगती चैव मज्जासु पङ्क्तिरेव च।
प्राणेषु बृहती छन्दो यजुर्वेदस्य लक्षणम् ॥ ५ ॥

एतदर्थे ऐतरेयश्रुतिः— ''शुक्लकृष्णकनीनिकेति स यदि ह वाऽअपि मृषावदति यऽएवमेतं छन्दसां छन्दस्त्वं वेद'' इत्यन्तम्।

पुण्याहवाचने मन्त्रान् प्रोक्षणे कङ्कणस्य च।
सभायां ब्रह्मयज्ञे च इषे त्वोर्जे यजुः पठेत् ॥ १ ॥

शाङ्ख्यायनं ब्रह्मयज्ञे इषे त्वोर्जे यजुः स्मरेत्।
श्रौते स्मार्ते च पूर्ते च सर्वकर्मसु योजितः ॥ २ ॥

ऋग्यजुः सामाथर्वाश्च सभायां कुण्डमण्डपे।
ब्रह्मयज्ञे प्रतिसरे पठेद्वै स्वस्तिवाचने ॥ ३ ॥

अन्यत्र समुदायश्च प्रायश्चित्ते सभासु ते।
यजुर्वेदोपनिषदे मन्त्राः शाकलसञ्ज्ञकाः ॥ ४ ॥

उपदिष्टाः शौनकेन आत्मशिष्याय शाकले।
तेषां शाकलमन्त्राणां यजुः सञ्ज्ञा समीरिता ॥ ५ ॥

यस्य वेदे शाकलमन्त्राः तस्य यजुः सञ्ज्ञा इत्यर्थः ॥ १ ॥

★ ★

व्याख्या चरणव्यूहस्य यजुःखण्डस्य तेन वै ।
विस्तारिता यथाबुद्धि महादेवप्रसादतः ॥

★ ★

इति चरणव्यूहे द्वितीयखण्डव्याख्या समाप्ता ॥

★ ★ ★ ★ ★

CHAPTER THREE

(concerning Sāmaveda)

तृतीयः सामवेदखण्डः

सामवेदस्य किल सहस्रभेदा आसीदनध्यायेष्वधीयानास्ते शतक्रतुवज्रेणाभिहताः प्रनष्टाः । शेषान्प्रवक्ष्यामि— असुरायणीया वासुरायणीयाः वार्तान्तरेयाः प्राञ्जलऋग्वैनविधा प्राचीनयोग्याः राणायनीयाश्चेति । राणायनीया नाम नव भेदा भवन्ति— राणायनीयाः शाट्यायनीयाः सात्यमुद्गलाः खल्वला महाखल्वला लाङ्गलाः कौथुमा गौतमा जैमिनीयाश्चेति । तेषामध्ययनमशीतिशतमाग्रेयं पावमानं चतुःशतमैन्द्रं तु षड्विंशतिर्यानि गायन्ति सामगास्तान्यधीत्य चण्डात्प्रचण्डतरो भवति शिष्टान्यधीत्य शिष्टाऽऽविंशतिको भवति । तत्र केचित्पुनर्ऋक्तन्त्रं सामतन्त्रं संज्ञाधातुलक्षणमिति विधीयन्ते ।

अष्टौ सामसहस्राणि सामानि च चतुर्दश ।
अष्टौ शतानि नवतिदशतिर्वालखिल्यकम् ॥

सरहस्यं ससुपर्णं प्रेक्ष्यस्तत्र बालखिल्याः ।
सारण्यकानि सौर्याणि ह्येतत्सामगणं स्मृतम् ॥ १ ॥

अथ तृतीयखण्डो व्याख्यायते—

सामवेदस्येति । किलेति प्रसिद्धौ सहस्रभेदा आसीत् । सहस्रभेदमध्ये शक्रेण वज्रेणाभिहताः प्रणष्टाः ।

अनध्यायेष्वधीयाना प्रीयन्ते विद्युताः खलु।

इति।

शेषान् शाखापाठकान्व्याख्यास्यामः। आसुरायणीया वासुरायणीया वार्तान्तरेयाः प्राञ्जलऋग्वैन-विधाः प्राचीनयोग्याः राणायनीयाश्चेति। तत्र राणायनीयानां नव भेदा भवन्ति। राणायनीयाः शाट्यायनीयाः सात्यमुद्गलाः खल्वलाः महाखल्वलाः लाङ्गलाः कौथुमाः गौतमाः जैमिनीयाश्चेति। तेषामध्ययनम्। अष्टौ सामसहस्राणि सामानि च चतुर्दशान्यष्टौ शतानि दशभिर्दश सप्तसु वालखिल्यः सुपर्णः प्रेक्ष्यमेतत्सामगणं स्मृतम्। अथ प्रकारान्तरेणाह— तत्र राणायनीयानां सप्त भेदा भवन्ति। राणायनीयाः सात्यमुग्राः कालेयाः महाकालेयाः लाङ्गलायनाः शार्दूलाः कौथुमाश्चेति। तत्र कौथुमानां षड्भेदा भवन्ति। कौथुमाः आसुरायणाः वातायनाः प्राञ्जलिद्वैर्नमृतः प्राचीनयोग्या नैगमीया इति। तेषां कौथुमादीनामध्ययनम्।

अशीतिशतमाग्नेयं पावमानं चतुःशतम्।
ऐन्द्रं तु षड्विंशतिर्यानि गायन्ति सामगाः।

तानि सूक्तान्यधीत्य चन्डादुत्कृष्टात्ते चण्डतरा अत्युत्कृष्टा भवन्ति। शिष्टानि व्यतिरिक्तानि अधीत्य पठित्वा शिष्टाऽऽविंशतिको भवति। शिष्टान् प्रामाणिकान् आविंशतिशिष्टेषु वा शिष्टभागाः प्रवेशयोग्याः शिष्टा अष्टाविंशतिगणानां पूरकाः सर्वश्रेष्ठो भवतीत्यर्थः। तत्र सूक्तेषु केचित् मन्त्रतन्त्रा इति मन्त्रश्चतुर्धा विधीयन्ते। तदाहाचार्यः— ऋक्तन्त्रं सामतन्त्रं सञ्ज्ञालक्षणं धातुलक्षणमिति।

इदानीं सामसङ्ख्यामाह—

अष्टौ सामसहस्राणि सामानि च चतुर्दश ।
अष्टौ शतानि नवतिदशतिर्वालखिल्यकम् ।।

सरहस्यं ससुपर्णप्रेक्ष्यं तत्सामदर्पणम् ।
सारण्यकानि सौर्याण्येतत्सामगणं स्मृतम् ।।

अशीतिशतमाग्नेयम् १८० । पावमानम् १०४ । ऐन्द्रन्तु २६ । शिष्टाः २८ गणानां पूरकाः । 'अष्टौ सामसहस्राणि' इत्यस्यार्थोऽङ्कतो ज्ञातव्यः ८८१४ । अन्यशाखासङ्ख्यामाह— 'नवतीति' । सुपर्णप्रेक्षः कश्चिच्छाखाभेदः तेन सह वर्तमानः ससुपर्णप्रेक्षः सुपर्णप्रेक्षेण सहितो वालखिल्यः शाखाभेदः । नवतिः नवतिसङ्ख्याकः दशतयो यस्मिन् स नवतिदशतिः । दशतिरिति । दशसङ्ख्या सञ्ज्ञा दशगुणा नवतिरित्यर्थः । अङ्कतोऽपि ९०० । 'सारण्यकानि' आरण्यकेनोपनिषद्भागेन सह वर्तमानानि सौर्याणि सूर्यदेवत्यानि सूक्तानि । तत्र वालखिल्यशाखायामेव आरण्यकं सूर्यसूक्तं सुपर्णप्रेक्षवालखिल्यानि मिलित्वा नवशतानीत्यर्थः । निगमयन्ति— एतत्पूर्वोक्तसामसमूहः स्मृतं कथितम् । गणशब्दस्य वलीयस्त्वं छान्दसम् । आसां षोडशशाखानां मध्ये तिस्रः शाखा विद्यन्ते । ताश्च गुर्जरदेशे कौथुमी प्रसिद्धा । कार्णाटके जैमिनी प्रसिद्धा । महाराष्ट्रदेशे राणायनी प्रसिद्धेति । आसां शाखानामध्यापकाचार्यस्त्रयोदश सङ्ख्याकाः । ते यथा—

राणायनी सात्यमुग्री दुर्वासा अथ भागुरिः ।
भारुण्डो गोर्गुजवीर्भगवानौपमन्यवः ।।

दारालो गार्ग्यसावर्णी वार्षगण्यश्च ते दश ।
कुथुमिः शालिहोत्रश्च जैमिनिश्च त्रयोदश ।।

इत्येते सामगाचार्याः स्वस्तिं कुर्वन्ति तर्पिताः ।। इति ।

अन्येऽपि भागवतद्वादशस्कन्धीयसप्ताध्यायपञ्चसप्ततितपद्यारभ्य अध्यायसमाप्तिपर्यन्तोक्ताः सामवेदप्रवर्तकास्ते यथा—

जैमिनेः सामगस्यासीत्सुमन्तुस्तनयो मुनेः ।
सुमन्वांस्तत्सुतस्ताभ्यामेकैकां प्राह संहिताम् ।। १ ।।

सुकर्माऽपि च तच्छिष्यः सामवेदतरोर्महान् ।
सहस्रं संहिताभेदं चक्रे साम्ना ततो द्विजः ।। २ ।।

हिरण्यनाभः कौसल्यः पौष्यञ्जिश्च सुकर्मणः ।
शिष्यौ जगृहतुश्चान्य आवन्त्यो ब्रह्मवित्तमः ।। ३ ।।

उदीच्याः सामगाः शिष्या आसन्पञ्चशतानि वै ।
पौष्यञ्ज्यावन्त्ययोश्चापि तांश्चोदीच्यान्प्रचक्षते ।। ४ ।।

लौगाक्षिर्लाङ्गलिः कुल्यः कुशीदः कुक्षिरेव च ।
पौष्यञ्जिशिष्या जगृहुः संहितास्ते शतं शतम् ।। ५ ।।

कृतो हिरण्यनाभस्य चतुर्विंशतिसंहिताः ।
शिष्य ऊचे स्वशिष्येभ्यः शेषा आवन्त्य आत्मवान् ।। ६ ।।

अस्यार्थः सामगस्य जैमिनेः पुत्रः सुमन्तुर्नाम तस्य सुमन्तोः सुतः सुमन्वान्नाम ताभ्यां सुमन्तुसुमन्वाभ्यां पुत्रपौत्राभ्यां क्रमेणैकैकां प्राह । सुकर्मापि तस्य जैमिनेः शिष्यो महानतिप्रज्ञावान् सामवेदाख्यतरोः साम्नां सहस्रसंहितारूपं भेदं चक्रे । कोसलपुत्रो हिरण्यनाभश्च पौष्यञ्जिश्च सुकर्मणः शिष्यो सामशाखां जगृहतुः । अन्ये आवन्त्य उदीच्यश्च सामशाखां जगृहतुः । पौष्यञ्ज्यावन्त्ययोश्चापि सामगाः पञ्चशतानि शिष्या आसन् । तेषां समुदितानां मतानां नामानीति पौष्यञ्जिशिष्या लौगाक्ष्यादयो नाम्ना शतं शतं संहितां जगृहुः । हिरण्यनाभस्य शिष्यो नाम्ना कृतश्चतुर्विंशतिसंहितां स्वशिष्येभ्य ऊचे शेषा अन्या संहिता आत्मज्ञानवानावन्त्यः स्वशिष्येभ्य ऊचे इत्यर्थः ।। १ ।।

व्याख्या चरणव्यूहस्य सामखण्डस्य तेन वै ।
विस्तारिता यथा बुद्धि महादेवप्रसादतः ।।

इति चरणव्यूहे तृतीयखण्डव्याख्या समाप्ता ।।

★ ★ ★ ★ ★

CHAPTER FOUR

(concerning Atharva-veda)

चतुर्थः अथर्ववेदखण्डः

अथर्ववेदस्य नव भेदा भवन्ति । पैप्पला शौनका दान्ता प्रदान्ता औता जावाला ब्रह्मपलाशा कुनखीवेददर्शी चारणविद्याश्चेति । द्वादशैव सहस्राणि पञ्चकल्पानि भवन्ति । कल्पे कल्पे पञ्चशतानि भवन्ति— नक्षत्रकल्पो विधानकल्पो विधिविधानकल्पः संहिताकल्पः शान्तिकल्पश्चेति । तत्र वेदानामुपवेदाश्चत्वारो भवन्त्यृग्वेदस्यायुर्वेद उपवेदो यजुर्वेदस्य धनुर्वेद उपवेदः सामवेदस्य गान्धर्ववेदोऽथर्ववेदस्यार्थशास्त्रं चेत्याह भगवान्व्यासः स्कन्दो वा । य इमे वेदाश्चत्वारस्तेषामेकैकस्य कीदृशं रूपं वर्णविधोच्यते— ऋग्वेदः पद्मपत्राक्षः सुविभक्तग्रीवः कुञ्चितकेशश्मश्रुः श्वेतवर्णो वर्णेन कीर्तितं प्रमाणं तावत्तष्ठन्तितस्तीः पञ्च, यजुर्वेदः पिङ्गाक्षः कृशमध्यस्थूलगलकपोलस्ताम्रवर्णः कृष्णवर्णो वा प्रादेशमात्रः षड्दीर्घत्वेन, सामवेदो नित्यं स्रग्वी सुप्रयतः शुचिवासाः शमी दान्तो बृहच्छरीरः शमी दण्डी कातरनयन आदित्यवर्णो वर्णेन नवारत्निमात्रोऽथर्ववेदस्तीक्ष्णः प्रचण्डः कामरूपी विश्वकर्ता क्षुद्रकर्मा स्वशाखाध्यायी प्राज्ञश्च महानीलोत्पलवर्णो वर्णेन दशारत्निमात्र ऋग्वेदस्यात्रेयसगोत्रं सोमदैवत्यं गायत्रीछन्दो, यजुर्वेदस्य काश्यपसगोत्रमिन्द्रदैवत्यं त्रिष्टुप्छन्दः, सामवेदस्य भारद्वाजसगोत्रं रुद्रदैवत्यं जगतीछन्दोऽथर्ववेदस्य वैतानसगोत्रं ब्रह्मदैवत्यमनुष्टुप्छन्दः ॥ १ ॥

अथ चतुर्थखण्डो व्याख्यायते—

अथर्ववेदस्येति । अथर्ववेदस्य नव भेदा भवन्ति नवशाखा भवन्तीत्यर्थः । तानाह पैप्पला दान्ता प्रदान्ता औता जाबाला शौनका ब्रह्मपलाशा कुनखीवेददर्शी चारणविद्याश्चेति । तेषामध्ययनं द्वादशैव

सहस्राणि मन्त्राणाम्। कीदृशानि पञ्चकल्पानि भवन्ति। अत्र बहुवचनात्ते बहवः। यत्र एकवचनं स एकः। तेषामध्ययनं शाखया उच्यते। द्वादशसहस्राणि मन्त्राणां कीदृशानि ? एकस्मिन्कल्पे कल्पे पञ्चशतानि मन्त्राणाम्। कल्पान्याह— नक्षत्रकल्पः विधानकल्पः विधिविधानकल्पः संहिताकल्पः शान्तिकल्पः इति पञ्चकल्पाः तत्र वेदानां चत्वार उपवेदा भवन्ति। यथा— ऋग्वेदस्योपवेद आयुर्वेदः चिकित्साशास्त्रम्। यजुर्वेदस्योपवेदो धनुर्वेदो युद्धशास्त्रम्। सामवेदस्योपवेदो गान्धर्ववेदस्सङ्गीतशास्त्रम्। अथर्ववेदस्यार्थशास्त्रं नीतिशास्त्रं शस्त्रशास्त्रं विश्वकर्मादिप्रणीतशिल्पशास्त्रम्। इति भगवान्वेदव्यासः स्कन्दः कुमारो वाऽऽह। य इमे चत्वारो वेदा उक्तास्तेषां मध्ये एकैकस्य कीदृशं रूपं आकारः तत्तद्वर्ण सितासितादि विधः प्रकारश्चोच्यते।

तत्रादौ ऋग्वेदस्वरूपमाह—

ऋग्वेदः पद्मपत्राक्षः— पद्मपत्रं कमलदलं तद्वदक्षिणी नेत्रे यस्य सः। सुविभक्तग्रीवः— सुविभक्ता रेखात्रयाङ्किता ग्रीवा यस्य सः। कुञ्चितकेशश्मश्रुःकुञ्चितावलीमन्तः केशाः शिरसिजाः श्मश्रूणि मुखरोमाणि यस्य सः। श्वेतवर्णः वर्णेन तु ककुब्वर्णो न, श्वेतवर्णः श्वेतो वर्णो यस्य सः। कीर्तितं प्रमाणं तावत्तिष्ठन्वितस्तीः पञ्च, तावत्साकल्येन पञ्च वितस्तीर्भवन्ति। ह्येतत्प्रमाणमृग्वेदस्य कीर्तितमुक्तम्। वितस्ति शब्दो द्वादशाङ्गुलात्मकः। सार्द्धहस्तद्वयप्रमाणमित्यर्थः। यजुर्वेदस्वरूपमाह—

यजुर्वेदः पिङ्गाक्षः— पिङ्गे पीते अक्षिणी यस्य सः। कृशमध्यस्थूलगलकपोलः— कृशं मध्ये कटि प्रदेशो यस्य सः। स्थूलौ गलकपोलौ यस्य सः। ताम्रवर्णः— ताम्रवदाचरितो रक्तो वर्णो यस्य सः। यद्वा कृष्णः वर्णो यस्य सः। दीर्घत्वेनोच्चत्वेन षट्प्रादेशमात्रप्रमाणं यस्य सः। 'प्रादेशस्तु प्रदेशिन्या' इत्यभिधानोक्तेः। अङ्गुष्ठप्रदेशिन्योर्विहितत्वात्प्रमाणप्रादेशो दशाङ्गुलः। तादृशाः षट्प्रादेशाः प्रमाणं षष्ट्यङ्गुलं सार्द्धद्वयहस्तमित्यर्थः। सामवेदस्य रूपमाह—

सामवेदो नित्यं स्रग्वी— स्रजो माला यस्य सन्तीति स्रग्वी। ''अस्मायामेधास्रजो विनिः'' (अष्टा० ५.२.१२१) इति सूत्राद्विनि प्रत्ययः। नित्यं पुष्पमालाधारी। सुप्रयतः यमनियमवान्। शुचिवासाः— शुचिः शुद्धं वासो वस्त्रं यस्य स शुद्धवस्त्रधारी । शमी—शान्तिरस्यास्तीति शमी शान्तमनाः । दान्तोनियतबाह्येन्द्रियः। बृहन्महच्छरीरं यस्य सः। शमीतरोर्दण्डो यस्य सः शमीदण्डी। कातरेऽल्पेऽक्षिणी द्वे नेत्रे यस्य सः। काश्चननयनो वा। आदित्यस्य भानोर्वर्ण इव वर्णो यस्य सः। श्वेतवर्णो वा नवारत्निप्रमाणं यस्य सः। सार्द्धचतुष्टयहस्तदीर्घ इत्यर्थः। अथर्ववेदस्वरूपमाह—

तीक्ष्णः उग्रः। प्रचण्डः क्रोधी। कामरूपी— कामेन रूपाणि यस्य सः स्वेच्छारूपधारी। विश्वस्य आत्मा जीवनम्। विश्वस्य कर्ता स्रष्टा च उपनिषद्बाहुल्यात्। क्षुद्रकर्मा— क्षुद्राणि कर्माणि यस्य सः। अभिचारकृत्याप्रयोजकमन्त्रबाहुल्यात्। स्वशाखाध्यायी— अथर्वणि विशेषः प्राज्ञश्च। महानीलोत्पल-वर्णो— वर्णेन श्यामकमल इव वर्णो यस्य सः श्यामसुन्दरः। दश अरत्नयः अकनिष्ठकहस्तः प्रमाणं यस्य पश्चहस्त प्रमाण इत्यर्थः। अथर्ववेदस्य रूपान्तरे पाठान्तरश्च— ''श्वेतसाध्यवशी च सजलमूर्धनि गालवः स्वदारजुष्टः परस्त्रियाः स्तन्यपश्चेति।''

अथ वेदानां गोत्रदेवताछन्दांस्याह— ऋग्वेदस्यात्रेयसगोत्रम्। आत्रेयाः सगोत्राः समानगोत्रा यस्य तत्। अत्रिगोत्रऋग्वेद इत्यर्थः। सोमदैवत्यं यस्य तत्। गायत्रो छन्दो यस्य तत्। एवमग्रेऽपि व्याख्यातव्यम्। अथ यजुर्वेदस्य काश्यपगोत्र इन्द्रदैवत्यं त्रिष्टुप्छन्दः। अथ सामवेदस्य भारद्वाजगोत्रं रुद्रदैवत्यं जगतीछन्दः। अथर्ववेदस्य वैतानसगोत्रं ब्रह्मदैवत्यं अनुष्टुप्छन्दः ॥ १ ॥

इति चरणव्यूहे चतुर्थखण्डव्याख्या समाप्ता ॥

★ ★ ★ ★ ★

CHAPTER FIVE

(concerning Benefits of Studiy)

पञ्चमः फलश्रुतिखण्डः

य इदं वेदानां नामरूपगोत्रं प्रमाणं छन्दोदैवतं वर्णं वर्णयति, अविद्यो लभते विद्या जातिस्मरोऽथ जायते, जन्मजन्मवेदपारगो भवत्यव्रती व्रती भवत्यब्रह्मचारी ब्रह्मचारी भवति नमः शौनकाय नमः शौनकाय ।

य इदं चरणव्यूहं गर्भिणीं श्रावयेत्स्त्रियम् ।
पुमांसं जायते पुत्रमृषिभिर्वेदपारगम् ॥

य इदं चरणव्यूहं श्राद्धकाले पठेद्द्विजः ।
अक्षय्यं तद्भवेच्छ्राद्धं पितॄंश्चैवोपतिष्ठते ॥

य इदं चरणव्यूहं पठेत्स पङ्क्तिपावनः ।
तारयेत्प्रभृतीन्पुत्रान्पुरुषान्सप्तसप्त च ॥

य इदं चरणव्यूहं पठेत्पर्वसु पर्वसु ।
विधूतपाप्मा स स्वर्गी ब्रह्मभूयाय गच्छति ॥

रतिर्धृतिश्शिवाश्यामाश्चत्वारो वेदपत्निकाः ।
ज्ञातव्या यज्ञकालेषु ईशानादि व्यवस्थिताः ॥

लक्षं तु चतुरो वेदा लक्षं भारतमेव च।
लक्षं व्याकरणं प्रोक्तं चतुर्लक्षं तु ज्यौतिषम् ॥

चतुर्लक्षं तु ज्यौतिषम् ॥

(समाप्तोऽयं ग्रन्थः ॥)

अथ पञ्चमखण्डो व्याख्याते—

अथ चतुर्वेदस्य फलस्तुतिमाह— य इदमिति। यः पुमानिदं वेदानां नाम रूपं गोत्रं प्रमाणं छन्दो दैवत्यं वर्णं वर्णयति। नामादीनां द्वन्द्वैकवद्भावः। नाम ऋग्वेदादि १, रूपं पद्मपत्राक्षादि २, गोत्रमात्रेयादि ३, प्रमाणं पञ्चवितस्त्यादि ४, छन्दो गायत्र्यादि ५, दैवत्यं सोमादि ६, वर्णं श्वेतादि च ७, इत्यादि यो जानाति स अविद्यो विद्याहीनः सन्विद्या लभते प्राप्नोति जातिस्मरोऽथ जायते। अथ जन्मान्तरे उत्तमजातिर्जायते पूर्वजातिं स्मरति। जन्म जन्म प्रतिजन्म वेदपारगः वेदपाठी भवति। अव्रती व्रती भवति व्रतहीनोऽपि व्रतवान्भवति। ब्रह्मचर्यहीनो ब्रह्मचर्यफलं प्राप्नोति। 'शौनकाचार्याय नमः' इति पदावृत्तिर्ग्रन्थसमाप्त्यर्थः। श्रवणपठनफलमाह— य इदमिति। यः पुमान् इदं चरणव्यूहं गर्भिणीं स्त्रियं श्रावयति सा स्त्री पुमांसं पुरुषलक्षणोपेतं पुत्रं जनयेत्। यः श्राद्धकाले द्विजः इदं चरणव्यूहं पठेत् तच्छ्राद्धं पितृन्तर्पयतीत्यर्थः। य इदं प्रत्यहं पठेत्स पङ्क्तिपावनो भवति। यस्यां पङ्क्तौ द्विज आस्ते तां सर्वां पङ्क्तिं पावयतीत्यर्थः। स च पुरुषः पुत्रान्प्रभृतीन्पुत्रादिकान्सप्तसप्त च पुनः सप्तवानरानाद्यादीन्पित्रादींश्च आत्मानं चैव पञ्चदशपुरुषान्तारयति। य इदं पठेत्पर्वसु अष्टमीभूतदर्शपौर्णमासी सङ्क्रान्तिषु च पठति स धूतपाप्मा दूराकृतः पापं येन सः। स स्वर्गवासी पवित्रः सन् ब्रह्मभावाय गच्छति। कर्मणि चेति चतुर्थी। ब्रह्मभावं प्राप्नोतीत्यर्थः।

यो नामानि पुरा वेदा अमृतत्वं च गच्छति ।
लोकातीतं महाशान्तममृतत्वं च गच्छति ॥

ॐ नमः इत्याह भगवान्पाराशर्यः । ॐ नमः परमर्षिभ्यो नमः ।

तं वेदशास्त्रपरिनिश्चितशुद्धबुद्धिं
चर्माम्बरं सुमुनीन्द्रतनुं कवीन्द्रम् ।
कृष्णद्विपं कनकपिङ्गजटाकलापं
व्यासं नमामि शिरसा तिलकं मुनीनाम् ॥

इति चरणव्यूहपञ्चमखण्डव्याख्या समाप्ता ॥

त्रिदशाङ्कधरा (१६१३) मिते गतेऽब्दे मधुमासे दशमीतिथौ सुधांशौ ।
महिदासबुधः परोपकृत्यै चरणव्यूहमिदं व्याकारि काश्याम् ॥ १ ॥

(Mahidāsa wrote this commentary during Vikrama era 1613, corresponding to 1526 A.D.)

विद्वद्भिः प्रार्थितेनेयम्महिदासद्विजन्मना ।
चरणव्यूहविवृतिर्विधिना तु मया कृता ॥ २ ॥

॥ समाप्तोऽयं ग्रन्थः ॥

★ ★ ★ ★ ★